Śatapatha Brāhmaṇa is the important Brāhmaṇa of the White Yajurveda and it is said to be by modern scholars as important as the Ṛg-Veda in as much as it furnishes many historical, geographical and cultural data about Ancient India. It perhaps marks the latest development of Brāhmaṇas since it contains many purāṇic legends. Its style also favours its later origin.

Its text has come down in two recensions, Kaṇva and Mādhyandina. The former is incompletely found in our Library (see No. 818). It was edited by Prof. Eggeling. The Maṇḍala Brāhmaṇa (Nos. 819-821) is only a part of this Śatapatha Brāhmaṇa.

(e) ATHARVAVEDABRĀHMAṆA.

The only Brāhmaṇa of Atharva Veda found in this Library is Gopatha Brāhmaṇa. It is a compilation of varied information gathered from other Brāhmaṇas—Śatapatha, Maitrāyaṇīya Taittirīya etc.

ĀRAṆYAKAS.

Āraṇyakas or forest books (generally studied in forest only) form the transition between Brāhmaṇas and Upaniṣads.

(a) AITAREYĀRAṆYAKA.

Aitareyāraṇyaka belonging to Ṛg-Veda consists of five Āraṇ-

yakas and it is ascribed to Āśvalāyana. The last four chapters of the Second Āraṇyaka in this book are designated Aitareyopaniṣad. The same were reprinted in the Ānandāśrama Series, Poona. Mr. A. B. Kieth has edited this Āraṇyaka with an introduction, English translation, notes and indices.

(b) BLACK YAJURVEDĀRAṆYAKA.

This work has come down to us in two important recensions, the North and the South. This work together with Sāyaṇa's commentary was edited in Bibliotheca Indica by Rājendralāl Mitra. The same with the commentary of Bhaṭṭabhāskara Miśra (of which an incomplete version is found here—see Nos. 893 & 894) is also available in print.

(c) MANTRAPRAŚNA.

Mantrapraśna otherwise known as Ekāgnikāṇḍa consists of two praśnas and it is a collection of Mantras used in the duties of a Dvija householder. These Mantras are studied in toto in two separate Praśnas (25th and 26th Praśnas) by Āpastamba in his extant work of Kalpasūtras. This work together with Haradatta's commentary was printed in Grantha Script in Kumbhakonam.

UPANIṢADS.

After the above, the Upaniṣads are dealt with in detail. For purposes of convenience, the Upaniṣads have been broadly classified into four main divisions. Firstly the Upaniṣads belonging to the Ṛg-Veda are noticed; then follow those belonging to the Sāmaveda, next those belonging to the Black Yajur-veda and White Yajur-veda and lastly those belonging to the Atharvaveda. Under each group, the Upaniṣads belonging to each Veda have been arranged alphabetically. In the end, a few miscellaneous

Upaniṣads, not classified as belonging to any specific Veda in the Muktikopaniṣad are also noticed.

Here ends Volume Second of the Descriptive Catalogue.

VEDĀṄGAS AND VEDALAKṢAṆAS.

In Vedāṅga Mss. No. 1700 Nighaṇṭubhāṣya, a commentary on Yāska's Nighaṇṭu, by Devarāja Yajvan edited for second time by Jīvānanda Vidyāsāgar in Calcutta, is very important since it gives variations in readings—readings good and suggestive in many cases. It is much more important from the historical standpoint as it records how in India Sanskrit Mss. were very dear and with what care and anxiety they were preserved by our ancestors and how these Mss. were badly handled and incorrectly copied down by some scribes who were not at all fit for their profession.

Next important Ms. on Vedāṅgas is Bhāskararāya's Vaidika-kośa with Nārāyaṇayajvan's commentary (Nos. 1720 and 21). It divides the whole group of words into two main Kāṇḍas—Nānāpada-kāṇḍa and Ekapadakāṇḍa. Both the text and the commentary are not yet printed so far.

There are many useful treatises on Vedalakṣaṇa section. There are found three or four versions of Śaunaka's Ṛg-Vidhāna which would be highly useful in preparing a critical edition. There is Bṛhad Ṛg-Vidhāna (No. 1727) ; there are Jyeṣṭha and Kaniṣṭha Ṛg-Vidhānas (Nos. 1729 & 1731), of which the Kaniṣṭha is now available in print in Bombay. The Ṛg-Vidhāna text was edited with notes and a detailed introduction by Rudolf Meyer.

There are three commentaries on Ṛg-Veda Prātiśākhya of which one (No. 1738) is yet to be identified. Between the

other two, the former is attributed to Viṣṇumitra and the latter to Uvaṭa. Between these two authors some confusion prevails. The Madras Catalogue emphasises that the work of Viṣṇumitra is a gloss on Uvaṭa's commentary on Ṛk-prātiśākhya. Dr. Burnell's observation also does not clear off the confusion. Evidently both are commentators on different portions of the same Ṛg-Veda Prātiśākhya. (See Remarks on Nos. 1733 & 1735).

The Ṛg-Veda Prātiśākhya was translated by F. Max Muller in 1869 and an edition of both the Sanskrit text and translation is now available. The same with Uvaṭa's commentary was edited by Dr. Mangal Deva Śāstrī.

Next come Ṛg-Vedasarvānukramaṇī and its commentaries. The only extant commentary is that of Ṣaḍguruśiṣya (No. 1940). Its importance as a guide to Vedas for Vedic students cannot be over-estimated. Its main importance is assured from the fact that it records fully and releventiy also how the Vedas have been handed down from one Ācārya to another; in this connection the names of Śaunaka, Āśvalāyana and Kātyāyana are specially mentioned.

Again, Ṣaḍguruśiṣya's monumental work called Vedārthadīpikā gives the accurate date of its completion by the author in Kalidina as the following verse states:

वेदार्थदीपिका नाम षड्गुरूणां प्रसादतः ।
खगोन्त्यामे(न्मे)षमापेति कल्यहोग(हर्ग)णने सति ॥

The Kalidina is given in symbolic language:—
'खगोन्त्यान्मेषमाप' which when put in numbers comes to 15,65,132 (ख=2 गो=3 न्त्या=1 मे=5 ष=6 मा=5 प=1). This number is descrip-

tively given by the author himself in the succeeding verse—


'लक्षाणि पञ्चदश वै पञ्चषाष्टिसहस्रकम् ।
द्वात्रिंशच्च शतञ्चेति दिनवाक्यार्थ ईरितः ॥'

This Kalidina 15,65,132 when reduced to years, months and days according to the English calculation comes to 4285 years 1 month and 6 days or Sunday 22nd May, 1188 A. D., when the author had finished this work. From this it can be definitely said that the author Ṣaḍguruśiṣya flourished during *the latter half of the twelfth century.*

Kātyāyana's Sarvānukramaṇī with extracts from Ṣaḍguruśiṣya's commentary—Vedārthadīpikā, was edited with critical notes and appendices by Professor A. A. Macdonell, M.A., PH.D.

Caraṇavyūha by Śaunaka is another important work in this section. Its importance also as a guide to the Vedas is clear in that it expressly gives the various recensions or schools of the four Vedas. The Mss. of Caraṇavyūha catalogued here belong to two different sets the important differences of which Dr. Burnell has taken pain to give in his 'Classified Index'. See Remarks on No. 1763. These Mss., however, abound in scriptorial errors; yet these would be very valuable for a critical edition of this work.

Here ends Volume Three of the Descriptive Catalogue.



V

LIST OF IMPORTANT ABBREVIATIONS.

1. J. L. Collection=Jambunātha Bhaṭṭa Lāṇḍagai Collection.
2. S. K. Collection=Seturāma Rao Kagalkar Collection
3. P. A. Collection=Pataṅga Avadhūta Collection.
4. T. S. Collection=Tyāgarāja Svāmi Collection.
5. S. S. Collection=Subrahmaṇya Śāstri Collection.
6. N. S. Collection=Nīlakaṇṭha Śāstri Collection.
7. D. S. T. Collection=Deva Śaṅkara Tawker Collection.
8. G. K. D. Collection=Gopāla Kṛṣṇa Devalekar Collection.
9. P. S. S. Collection=Peshwa S. Subrahmaṇya Rau Collection.
10. K. M. Collection=Kṛṣṇāji Mehta Collection.

[ ]=The Right-angular brackets indicate the suggestion of the removal of the letters therein.

( )=The Circular brackets indicate sometimes the suggestion of correct reading and sometimes the supply of omitted portions at the beginning and end of incomplete Mss.

*=Stars indicate the continuity of the text in the manuscript.

...=Mere dots indicate the omission of the text in question.

THE SCHEME OF TRANSLITERATION.

The System of Transliteration adopted in this Descriptive Catalogue is, as follows: —

अ	— a	ग	— ga	न	— na
आ	— ā	घ	— gha	प	— pa
इ	— i	ङ	— ṅa	फ	— pha
ई	— ī	च	— ca	ब	— ba
उ	— u	छ	— cha	भ	— bha
ऊ	— ū	ज	— ja	म	— ma
ऋ	— ṛ	झ	— jha	य	— ya
ॠ	— ṝ	ञ	— ña	र	— ra
ऌ	— ḷ	ट	— ṭa	ल	— la
ए	— e	ठ	— ṭha	व	— va
ऐ	— ai	ड	— ḍa	श	— śa
ओ	— o	ढ	— ḍha	ष	— ṣa
औ	— au	ण	— ṇa	स	— sa
ं	— ṃ	त	— ta	ह	— ha
ः	— ḥ	थ	— tha	ळ	— ḷa
क	— ka	द	— da	ೞ	— ḻa
ख	— kha	ध	— dha		

॥ उपनिषद्भाष्यम् ॥

१. अद्वैतम् ॥

UPAṆIṢAD-BHĀṢYA.

1. ADVAITA.





A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATĪ MAHĀL LIBRARY.

॥ अथर्वशिखोपनिषद्दीपिका ॥

1427. ATHARVAŚIKHOPANIṢADDĪPIKĀ.

J. L. Collection No. 153. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{5}{8}$ inches. Sheets—6. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—140. Author—Śaṅkarānanda. Complete.

Beginning :

श्रीशिवाय नमः ॥

व्याख्याऽथर्वशिखानाम्न्याः श्रुतेः क्लेशविनाशिनी ।
क्रियते ब्रह्मबोधार्थं तया शुद्ध्यतु मे मनः ॥ १ ॥

ब्रह्मविद्याप्राप्त्यर्थं तपोविद्यासम्पन्नैरपि गुरुशुश्रूषादि करणीयमित्येतदर्थं प्रथमत आख्यायिकामवतारयति ॥ अथ अधिकारसंपत्त्यनन्तरं ह किल एवं वक्ष्यमाणमाथर्वणं पैप्पलादः पिप्पलं कर्मफलं तदत्तीति पिप्पलादः

स्वयमुद्यमशून्यः पुराकृतकर्मवशात्प्राप्तान्नोदकादिना शरीरधारक इत्यर्थः । स एव पैप्पलादः तदपत्यं वा(ऽ)ङ्गिराः अङ्गानां रसः प्राणमात्मत्वेन जानाति अङ्गिराः । सनत्कुमारश्च सनत्प्रार्थितमात्मानमपि यच्छन् कुत्सितं कामक्रोधादिकं मारयतीति— सनत्कुमारः । चशब्दादन्योऽपि तदनुगता नारदाद्या अथर्वाणं अथर्वनामधेयं उवाच उक्तवान् ॥

End:

उक्तमर्थमुपसंहरति । परः उत्कृष्टः ईशो वा ईश इव ईश्वर एवेत्यर्थः । शिवः मङ्गलः एकः देशकालवस्तुपरिच्छेदशून्यः ध्येयः ध्यानयोग्यः शिवङ्करः मङ्गलकरः सर्वं निखिलं अन्यत् शिवव्यतिरिक्तं परित्यज्य स्पष्टं समाप्ता समाप्तिं गता अथर्वशिखा अथर्ववेदे शिखेव सारभूता उपनिषत् अथर्वशिखा । एतामथर्वशिखामधीत्य पाठतोऽर्थतश्च स्वाधीनं कृत्वा द्विजः त्रैवर्णिकः गर्भवासात् गर्भवासमूलादज्ञानात् विमुक्तः आत्मज्ञानेनापगताज्ञानो जीवन्विमुच्यते । देहपाते सर्वथा संस्कारहीनत्वेन मुक्तो भवति । इति(ः) उपनिषदर्थसमाप्त्यर्थः ॥ उपनिषत्प्रतिपाद्यमर्थं समाप्तौ दर्शयति— ॐ ॥ ॐकारः । सत्यं अबाधितरूपं जगतो नन्व(त्व)न्यत् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्री शङ्करानन्द भगवतः कृतिरथर्वशिखोपनिषद्दीपिका सम्पूर्णा ॥

श्री विश्वाधिकाय परब्रह्मणे शिवाय नमः ॥

शुभकृन्नभो वलक्षद्वादश्यां चेन्दौ वृकोपनामक महादेवेन ह्यलेखि ॥

Subject : Atharvaśikhopaniṣad dīpikā—an independent commentary on Atharvaśikhopaniṣad, according to the Advaita system of Philosophy.

Remarks :—The Ms. is old and is an good condition. The author of this commentary is Śaṅkarānanda. His guru is Ānandātma Pūjyapāda. He is always surnamed as Śaṅkarānanda bhagavatpāda. See colophons on Nos. 1433, 1434 & 1436. His commentaries on this and on other Upaniṣads are based on the bhāṣyas of Śrī Śaṅkarācārya. The scribe's name is given as Vṛka Mahādeva.

॥ अथर्वशिखोपनिषद्दीपिका ॥

1428. ATHARVAŚIKHOPANIṢADDĪPIKĀ.

Burnell's Catalogue No. 9754 q. Page 28. Left column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Sheets—3 (65 to 67). Lines—11 to a Page. Script—Telugu. No. of Granthas—130. Author—Śaṅkarānanda. Incomplete.

Beginning :

"अथ हैनं पैप्पलादो(ऽ)ङ्गिराः सनत्कुमारश्चाथर्वणमुवाच"। सनत्कुमारश्च—सनत्प्रार्थितमात्मानमपि यच्छन्० —Same as No. 1427.

End :

द्विजः त्रैवर्णिकः गर्भवासात् गर्भवासमूलादज्ञानाद्विमुक्तः । आत्मज्ञानेन.... ॥

Colophon : Nil.

Subject—Same as No. 1427.

Remarks :— The Ms. is in good condition.

This Ms. contains the following works :—

1 कठवल्ल्युपनिषद्दीपिका ॥

2 ईशावास्योपनिषद्दीपिका ॥

3 माण्डूक्योपनिषद्दीपिका ॥

4 प्रश्नोपनिषद्दीपिका ॥

5 केनोपनिषद्दीपिका ॥
6 जाबालोपनिषद्दीपिका ॥
7 आरुणिकोपनिषद्दीपिका ॥
8 ऐतरेयोपनिषद्दीपिका ॥
9 गर्भोपनिषद्दीपिका ॥
10 कैवल्योपनिषद्दीपिका ॥
11 ब्रह्मोपनिषद्दीपिका ॥
12 हंसोपनिषद्दीपिका ॥
13 अमृतनादोपनिषद्दीपिका ॥
14 अमृतबिन्दूपनिषद्दीपिका ॥
15 अथर्वशिर उपनिषद्दीपिका ॥
16 अथर्वशिखोपनिषद्दीपिका ॥
17 नारायणोपनिषद्दीपिका ॥

॥ अथर्वशिखोपनिषद्दीपिका ॥

1429. ATHARVAŚIKHOPANIṢADDĪPIKĀ.

J. L. Collection No. 164 f. Substance—Paper. Size—$11\frac{5}{8} \times 5\frac{1}{8}$ inches. Sheets—4 (41-44). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Nārāyaṇāśramin. Complete.

Beginning:

एषाथर्वशिखा नाम शिर ऊर्ध्वं शिखोचिता ।
द्विषडासप्तमीमुण्डात्प्रणवार्थनिरूपिणी ॥

सर्वार्थसिद्धिदं शिवमाराध्य विधूतविघ्नशतो भगवन्महेश्वरपूजनेन विधूताखिलकिल्बिषो देशिकः क्षुरिकोक्तमार्गेण साधितयमादिप्रत्याहारान्तयोगाङ्गो धारणापूर्वकं ध्यानपथमारुरुक्षुः सबीजयोगे मन्त्रस्याङ्गत्वात्सर्वमन्त्रशिरोमणिं प्रणवमवयवशः स्वरूपतश्च निर्णीय ध्याने विनियोक्तुं पुनः प्रकृतं तमेवानुसन्धत्ते । ॐ पिप्पलाद इति । अत्र प्रष्टॄणां त्रित्वमेभ्य इत्यग्रे अनुवादादवसीयते । आख्यायिका तु विद्यास्तुत्यर्था । प्रश्नानाह— किमादाविति । पादौ मुख्यत्वेन च प्रयुक्तं ध्यायते— यस्त-

दिति । व्युत्पत्या ध्यानं ध्येयं ध्यायितव्यं ध्यानार्हं च किमित्यर्थः ॥

End:

ईश एव परमो ध्येय इति चतुर्थमुत्तरमुपसंहृतम् । अध्ययनफलमाह— एतामिति । एतां उपनिषदमप्यथर्वशिखासंज्ञां । द्विज इति शूद्रनिरासः । द्विरुक्तिः समाप्त्यर्था । इति शब्दश्च ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका(ऽ)थर्वशैखिके ॥

Colophon:

इत्यथर्वशिखोपनिषद्दीपिका समाप्ता ॥

Subject: Atharvaśikhopaniṣad dīpikā—an independent commentary on Atharvaśikhopaniṣad, according to the Advaita system of Philosophy.

Remarks :—The Ms. is in good condition, though the sheets are a bit rat-eaten. The author of this commentary is Nārāyaṇāśramin, son of Bhaṭṭaratnākara, grandson of Śrīnātha (See colophon in No. 1554). He is no doubt later than Gauḍapāda, Sri Śaṅkarācārya and Ānanda jñāna or Ānanda giri. (See the beginning of No. 1554). His commentaries on 28 Upaniṣads are based on the Advaita doctrines set up by Gauḍapādācārya and Śrī Śaṅkarācārya.

This Ms. contains the following works :—

1 मुण्डकोपनिषद्दीपिका ॥
2 ब्रह्मविद्योपनिषद्दीपिका ॥
3 क्षुरिकोपनिषद्दीपिका ॥
4 चूलिकोपनिषद्दीपिका ॥
5 अथर्वशिर उपनिषद्दीपिका ॥
6 अथर्वशिखोपनिषद्दीपिका ॥
7 गर्भोपनिषद्दीपिका ॥
8 महोपनिषद्दीपिका ॥
9 ब्रह्मोपनिषद्दीपिका ॥
10 प्राणाग्निहोत्रोपनिषद्दीपिका ॥
11 माण्डूक्योपनिषद्दीपिका ॥

॥ अथर्वशिर उपनिषद्दीपिका ॥

1430. ATHARVAŚIRA UPANIṢADDĪPIKĀ.

J. L. Collection No. 152. Substance—Paper. Size—10½ × 4½ inches. Sheets—28. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—480. Author—Śaṅkarānanda. Complete.

Beginning:

श्रीगुरुभ्यो नमः । श्रीचिदम्बरसभानटाय परस्मै ब्रह्मणे नमः ॥

वक्ष्येऽथर्वशिरोनाम्न्याः श्रुतेर्व्याख्यां पदानुगाम् ।
रुद्रात्मैक्यावगत्यर्थं रुद्रस्तुष्टोऽस्तु नस्तया ॥

विद्याया अतिदुर्लभत्वप्रदर्शनार्थमाख्यायिकामवतारयति । देवाः । इन्द्राग्निवायुप्रभृतयो रुद्रजिज्ञासवः । ह किल । वै प्रसिद्धः । स्वर्गं स्वः । सुखस्वरूप आनन्दात्मा गम्यते यस्मिन् लोके स स्वर्गः तं लोकं रुद्रनिवासभूतं ब्रह्मलोकमितीत्यर्थः । अगमन् गतवन्तः । तत्र गत्वा नीललोहितं त्रिलोचनं पिनाकपाणिं चित्रं पुरुषमालोक्य । ते स्वर्गताः देवाः उक्ताः । रुद्रं सर्वदुःखनाशकं । सृष्टिस्थितिविनाशकारणं अपृच्छन् । पृष्टवन्तः ॥

End:

आचक्षुषः यावच्चक्षुर्दर्शनं । पङ्क्तिं अपाङ्क्तेयानां पङ्क्तिं । पुनाति पवित्रीकरोति । इत्यनेन प्रकारेणाह उक्तवान् । भगवान् भूतानामुत्पत्त्यादिज्ञानवान् । अथर्वशिरः अथर्ववेदान्तः । अथर्वशिरः अथर्वशिरः व्याख्यातं । अभ्यास आदरार्थः, उपनिषदर्थपरिसमाप्त्यर्थो वा ।



इदानीं अथर्वशिरोनामनिरुक्तिमाख्यायिकया आह। अथर्वणः कदाचित्कश्चन शापं ददौ। तं शापमाह—अद्य अस्मिन्काले मद्वचनं वज्रं मूर्धानं मस्तकं अस्य विरोधिनः शंसीः अधः पातयेत्यर्थः।

* * * * *

विद्यां ब्रह्मविद्याफलां वेदाध्ययनादिरूपं अन्नमथो मनो विद्यामन्नमथो मनः मोक्षं अविद्यातत्कार्येभ्यो विमुक्तिं अन्नमथो मनो मोक्षमन्नमथो मनः व्याख्यातं। अभ्यासो वाक्यत्रयेऽप्युपनिषत्समाप्त्यर्थः। श्रीविद्यामोक्षाणां जनिफलत्वात् पृथग्वाक्यत्रयेणाभ्यासः। तेन प्रार्थना श्रीविद्यामोक्षाणामन्नमनोहीनेन प्राप्तुमशक्यत्वात् एतद्द्वयमेव मुख्यं साधनमिति दर्शयितुं प्रतिवाक्यमन्नमनसोः प्रार्थनम्॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिरथर्वशिरो(र उ)पनिषद्दीपिका समाप्ता॥

ॐ तत्सत्। श्रीचित्सभेशार्पणमस्तु।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

Subject: Atharva Śira Upaniṣad dīpikā—a commentary on Atharva Śira Upaniṣad, according to the Advaita system of Philosophy. 1-6 Sections.

Remarks:—The Ms. is old and is in good condition. In this Ms. the pratīkas taken from the Atharva Śira Upaniṣad for interpretation prefectly agree with the upaniṣad text described in No. 1290.

॥ अथर्वशिर उपनिषद्दीपिका ॥

1431. ATHARVAŚIRA UPANIṢADDĪPIKĀ.

Burnell's Catalogue No. 9754 p. Page 28. Right column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—7 (58-64). Lines—10 to a Page. Script—Telugu. No. of Granthas—465. Author—Śaṅkarānanda. Incomplete.

Beginning and subject—Same as No. 1430.

End :

मस्तिष्काद्दशमद्वारस्याधस्तात्स्वदितघृताकारो मांसपिण्डो मस्तिष्कः, तस्मात् ऊर्ध्वः ऊर्ध्वं उपरिभागे प्रेरयन् खलिङ्गशरीरस्य प्रेरणं करोति। पवमानः प्राणोपासनेन प्राणात्मा(ऽ)थर्वा वायुरूपः। अथ मस्तिष्कादूर्ध्वमागमनानन्तरं शीर्ष्णः मस्तिष्कस्थदशमद्वारात् ऊर्ध्वं प्रेरयन्नित्यनुषज्यते। एवं कृते(ऽ)थर्वणः शिरः पतितं ततः तच्छापपतितमिव अथर्वणः शिरः। स्पष्टं। देवकोशः सर्वदेवा निर्वेदात्मकस्य प्राणस्य.... ॥

Colophon : Nil.

Remarks :—This Ms. breaks off towards the end of the commentary of this Upaniṣad. The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

॥ अथर्वशिर उपनिषद्दीपिका ॥

1432. ATHARVAŚIRA UPANIṢADDĪPIKĀ.

J. L. Collection No. 164 e. Substance—Paper. Size—$11\frac{3}{4} \times 5\frac{1}{4}$ inches. Sheets—10 (32-41). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Nārāyaṇāśramin. Complete.

Beginning :

रुद्राध्यायोथ(ऽ)र्वशिरः सप्तखण्डो ह्यथर्वणः ।
शिरो भित्वा यतो जातं ततोऽथर्वशिरः स्मृतम् ॥

योगमारूढस्य महत्पदमारुरुक्षोर्मुनि(ने)र्देवादिकृतविघ्न-
सम्भावना अगम्यार्थोपदेशापेक्षा च स्यादतो विघ्ननिवृत्तये
उपदेशाय च रुद्रश्रुतिरारभ्यते । किञ्च योगोऽपि तत्प्र-
सादं विना न सिध्यति ॥

यथा (च) स्मृतिः—

"न सिध्यन्ति महायोगा मदीयाराधनं विना ।
मत्प्रसादविहीनानां मन्निन्दापरचेतसाम् ॥
पशूनां पाशबद्धानां योगः क्लेशाय जायते ।
सन्त्यज्याज्ञां शिवेनोक्तां पूजां सन्त्यज्य मामिकाम् ॥" इति ॥
तत्प्रसादे च निर्विघ्नं सिद्धिरुक्ता ॥
युञ्जानः सततं देवि सर्वलोकमिमं(मयं)शिवम् ।
मद्ध्यानसक्तचित्तस्य तुष्यन्ते सर्वदेवताः ॥
तस्मात्सम्पूज्य युञ्जीत मत्प्रसादेन खेचरीम् ।
अन्यथा क्लिश्यते(ऽ)त्यर्थं न सिद्धिर्जन्मकोटिभिः ॥ इति ॥

अमृतबिन्दौ रुद्राराधनतत्पर इति तदाराधनस्य योग-
सिद्ध्यङ्गत्वेनोक्तत्वाच्च । अतः सिद्धिमिच्छता रुद्रोऽवश्यं
सेव्य इति रुद्रश्रुतिरारभ्यते—ॐ देवा इति ॥

End :

एवमेवानुप्रविशतीति विशेषमपश्यन्सामान्यमेव प्र-
विशति । तच्च सामान्यरूपं ब्रह्मैव मोक्षं यातीत्यर्थः ।
यद्वा ए विष्णुर्वः शिवः तयोः समाहारः एवं हरि-
हरस्वरूपं तदेवानुप्रविशतीति । एर्विष्णुर्वैः शिवः वो

महेश्वर इति चैकाक्षरनिघण्डुः हरोपाप्त्या हरिशाश्चिर-विरुद्धैकमूर्तित्वात्तयोरिति । किं तत्सामान्यरूपं यदनुप्र-विशतीत्यपेक्षायामाह—सत्यमिति । ॐकारवाच्यं सत्य-मित्यर्थः । हरिहररूपमध्येतदुभयवाच्यं भवति एकवाक्यं वा ॐकारवाक्यं सत्यमेव साधनान्तरं विनैवानुप्रविश-तीति । द्विरुक्तिः समाप्त्यर्था ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका(ऽ)थर्वमस्तके ॥

Colophon :

इत्यथर्वशिर उपनिषद्दीपिका समाप्ता ॥

Subject: Atharva Śira Upaniṣad dīpikā—a commentary on Atharva Śira Upaniṣad, based on the Advaita system of Philosophy.

Remarks:—For the other works contained herein see the list under Remarks on No. 1429. The Ms. is old and is in good condition, though the sheets are here and there rat-eaten.

॥ अमृतनादोपनिषद्दीपिका ॥

1433. AMṚTANĀDOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 n. Page Right column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$—inches. Leaves—5 (50-54). Lines—11 to a Page. Script—Telugu. No. of Granthas—270. Author—Śaṅkarānanda. Complete.

Beginning :

॥ ओं ॥

व्याकरिष्ये(ऽ)हममृतनादोपनिषदं श्रुता(तिं)म् ।
अमृतं ब्रह्म सर्वेषामर्पयन्ति पदे पदे ॥

शास्त्राणि ऋगादीनि नानाशाखाभेदभिन्नानि साङ्ग-वेदोपविद्यानि आत्मैक्यावगतिफलानि अधीत्य अधिगम्य

पाठतो(ऽ)र्थतश्च स्वाधीनानि कृत्वेत्यर्थः । मेधावी श्रुतधारणशक्तिमान् अभ्यस्य च पुनः पुनः स्वाधीनपाठार्थान्यपि संवादाय स्वगुरूणां नियोगे सदा श्रोतृभिस्सह वा स्वशिष्याणामुपदेशार्थं वा भूयो भूयः आवृत्तिं कृत्वा— च शब्दात् संशयविपर्ययनिवृत्तावपि परमं निरतिशयमनुपचरितमित्यर्थः ॥

End :

यत्र यत्र म्रियेतापि । अपि शब्दो वाशब्दार्थः । यत्र यत्र वाराणस्यादौ प्राणान्परित्यजेत् । मूर्धद्वारेण विनिर्गतो(ऽ)र्चिरादिमार्गेण ब्रह्मलोकं प्राप्य तत्रोत्पन्नब्रह्मज्ञानः । न सः । मूर्धनि विनिर्गतः । भूयः । एतच्छरीरोत्पत्त्यनन्तरं । अभिजायते । न सर्वत उत्पद्यते । न स भूयो(ऽ)भिजायते । व्याख्यातं । पादाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः । इति । इतिशब्द उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिरमृतनादोपनिषद्दीपिका समाप्ता ।

Subject: Amṛtanādopaniṣad dipikā— a commentary on Amṛtanādopaniṣad, belonging to the Advaita school of Philosophy.

Remarks :—For the other works contained in this Ms. see the list under Remarks on No. 1428. The Ms. is in good condition.

॥ अमृतबिन्दूपनिषद्दीपिका ॥

1434. AMṚTABINDŪPANIṢAD DIPIKĀ.

Burnell's Catalogue No. 9754 o. Page 29. Left column.

Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—

3 (55-57). Lines—11 to a Page. Script—Telugu. No of Granthas.—180. Author—Śaṅkarānanda. Complete.

Beginning :

व्याख्यास्ये(ऽ)मृतबिन्द्वाख्यां तत्त्वोपनिषदं परां ।
अमृतेशस्तथा देवः प्रीयतां परमेश्वरः ॥

ब्रह्मात्मैक्यविज्ञानादशेषानर्थनिवृत्तिरानन्दावाप्तिश्चेति सर्वोपनिषदां सिद्धान्तः। ब्रह्मज्ञानं च श्रवणादिना मनस्सहकृतेन । मनश्च मत्तद्विपपतिदुर्निग्रहं मनुजानामतस्तदेव प्रथमत आदौ । मनः अन्तःकरणं । अनेकवृत्तिमत् हि यस्मात् द्विपथं द्विप्रकारं । प्रोक्तं प्रकर्षेण कथितं ॥

End :

सर्वस्यानुग्राहकत्वेन हेतुना तत् ब्रह्म वासुदेवात्मकं अस्मि भवामि। अहमानन्दात्म(क)स्य रूपः ततो भेदरहितः। वासुदेवः सर्वाणि भूतानि यस्मुपवसन्ति अहं सर्वेषु भूतेषु वसामीति वासुदेवः स्वयंप्रकाशः । वासुश्चासौ देवश्चेति वासुदेवः। तदस्म्यहं वासुदेवः । व्याख्यातं। वाक्याभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिरमृतबिन्दूपनिषत्समाप्ता ॥

Subject: Amṛtabindūpaniṣad dīpikā—a commentary on Amṛtabindūpaniṣad belonging to the Advaita school of Philosophy.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

॥ अमृतबिन्दूपनिषद्दीपिका ॥

1435. AMṚTABINDŪPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9755 a (c). Page 29. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—7 (1-7 or 132-138). Lines—6 to a Page. Script—Telugu. No. of Granthas—176. Author—Śaṅkarānanda. Incomplete. (wants end).

Beginning and Subject—Same as No. 1434.

End:

सर्वानुग्राहकत्वेन । एकस्याधाराधेयत्वे हेतुरयं । सर्व-

स्या(नुग्राहकत्वेन हेतुना).........

Remarks:—The Ms. is in a fairly good condition. Regarding this Ms. Dr. Burnell remarks in his Catalogue as follows: "This Ms. contains 7 leaves (1-7) and it wants 3 lines at the end which are to be found at the beginning of No. 9756". But the leaves of this Ms. are numbered from 132 to 138. It formed the third work under this No. 9755 (c). The other two works contained in this Ms. are (1) कैवल्योपनिषद्दीपिका L. L. 116-123, (2) ब्रह्मोपनिषद्दीपिका L. L. 124-131. See also the description of No. 9756— जाबालोपनिषद्दीपिका ॥

॥ आरुणिकोपनिषद्दीपिका ॥

1436. ĀRUṆIKOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 g. Page 29. Right column. Substance— Palm leaf. Size—$19\frac{1}{2} \times 1\frac{3}{4}$ inches. Leaves—3 (31-33). Lines—12 to a Page. Script—Telugu. No. of Granthas—200. Author—Śaṅkarānanda. Complete.

Beginning:

आरुणिं ह्योपनिषदं व्याख्यास्ये न्यासपूर्वगां ।

आनन्दात्मानमायान्तं गङ्गानन्दं पयोनिधिम् ॥

विषयादेश्च सर्वोपनिषदां साधारण्यां न(ण्यान्न) पृथग्व-
र्णनीयता । आत्मज्ञाने सन्यासे चात्यन्तमास्तिक्यं जन-
यितुमाख्यायिकामवतारयति— आरुणिनामतः ॥

End :

ननु कस्येदमनुशासनमित्यत आह । वेदानुशासनं ।
वेदस्य भगवतः शब्दराशेस्सर्वज्ञस्य वर्णाश्रमादिव्यवस्था-
हेतो राजकल्पस्यानुशासनं । वेदानुशासनं । अस्याः
उपनिषत्समाप्त्यर्थः । इत्युपनिषदन्तरस्यापि एतावदर्थ-
पर्यवसायित्वमित्येतदर्थं इति शब्दः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य
श्रीशङ्करानन्दभगवतः कृतिरारुणिकोपनिषद्दीपिका समाप्ता ॥

Subject: Āruṇikopaniṣad dīpikā—a commentary on Āruṇikopaniṣad, belonging to the Advaita school of Philosophy.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

॥ ईशावास्योपनिषद्भाष्यम् ॥

1437. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

T. S. Collection No. 99. Substance—Paper. Size—10 × 4¾ inches. Sheets—20. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Śaṅkarācārya. Complete.

Beginning :

श्रीगणेशाय नमः ॥

ईशावास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषाम-
कर्मशेषस्यात्मनो याथात्म्यप्रतिपादकत्वात् । याथात्म्यं

चात्मनः शुद्धत्वापापविद्धत्वैक(त्वनित्य)त्वाशरीरत्वसर्वगतत्वादिवक्ष्यमाणं । तच्च कर्मणा विरुद्ध(ध्य)त इति युक्त एवैषां कर्मस्वविनियोगः । न चैवं लक्षणमात्मनो याथात्म्यमुत्पाद्यमाप्यं विकार्यं संस्कार्यं वा कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात् । सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् । गीतादीनां मोक्षशास्त्राणाञ्चैवं परत्वात् ।

End:

नापि संशयः । अज्ञानं वा । 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र (को मोहः कश्शोकः एकत्वमनुपश्यतः' इति) (शोक) मोहाद्यसम्भवश्रुतेः । अविद्यासम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम । 'अमृतमश्नुत' इत्यापेक्षिकममृतं । विद्याशब्देन परमात्मविद्याग्रहणे 'हिरण्मया '(इत्या)दिना द्वारमार्गादियाचनमनुपपन्नं स्यात् । तस्माद(द्य)थाव्याख्यात एव मन्त्राणामर्थ इत्युपरम्यते ।

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशङ्करभगवत्पादकृतौ वाजसनेयसंहितोपनिषद्भाष्यं समाप्तम् ॥

Subject: Īśāvāsyopaniṣad Bhāṣya belonging to the Advaita system of Philosophy.

Remarks:—The Ms. is in good condition, though the sides are a bit worn out.

॥ ईशावास्योपनिषद्भाष्यम् ॥

1438. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 a. Page 29. Right column.

Substance—Palm leaf. Size—$18\frac{3}{4} \times 1\frac{1}{2}$ **inches. Leaves—14** (1-14). Lines—5 to a Page. Script—Grantha. No. of Granthas—200. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1437.

Remarks:—This Ms. contains the following bhāṣyas :

(1) ईशावास्योपनिषद्भाष्यम् ॥ (5) मुण्डकोपनिषद्भाष्यम् ॥

(2) केनोपनिषद्भाष्यम् ॥ (6) माण्डूकयोपनिषद्भाष्यम् ॥

(3) कठवल्ल्युपनिषद्भाष्यम् ॥ (7) तैत्तिरीयोपनिषद्भाष्यम् ॥

(4) प्रश्नोपनिषद्भाष्यम् ॥ (8) ऐतरेयोपनिषद्भाष्यम् ॥

The Ms. is in a fairly good condition.

॥ ईशावास्योपनिषद्भाष्यम् ॥

1439. ĪŚĀVĀSYOPANIṢAD BHAṢYAM.

S. S. Collection No. 13 a. Substance—Paper. Size—$12\frac{3}{8} \times 7\frac{3}{4}$ inches. Sheets—4. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Śaṅkarācārya. Complete.

Beginning :

श्रीगणेशाय नमः ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

ईशावास्यमित्यादयो मन्त्राः० Same as No. 1437.

End, colophon and subject—Same as No. 1437.

Remarks:—The Ms. is old and is in good condition. The paper is blue in colour. The Ms. contains the following works :

1. ईशावास्योपनिषद्भाष्यम् ॥ 4. प्रश्नोपनिषद्भाष्यम् ॥

2. केनोपनिषद्भाष्यम् ॥ 5. मुण्डकोपनिषद्भाष्यम् ॥

3. कठोपनिषद्भाष्यम् ॥ 6. माण्डूक्योपनिषद्भाष्यम् ॥

7. माण्डूक्यकारिकाभाष्यम् ॥ 8. तैत्तिरीयोपनिषद्भाष्यम् ॥
9. ऐतरेयोपनिषद्भाष्यम् ॥

॥ ईशावास्योपनिषद्भाष्यम् ॥

1440. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9741 b. Page 29. Right column. Substance—Palm leaf. Size—20×1⅝ inches. Leaves—2 (28 & 29). Lines—12 to a Page. Script—Telugu. No. of Granthas—120. Author—Śaṅkarācārya. Incomplete.

Beginning—Same as No. 1437.

End :

तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः
सन्तोनुतिष्ठन्तीत्यभिप्रायः । ततः तस्मादन्धात्मकात्तमसो
भूय इव बहुतरमिव तमः प्रविशन्ति (के कर्म हित्वा ये उ
ये तु विद्यायामेवं(व) एव देवताज्ञाने रताः अनिरताः) ॥

Subject: Īśāvāsyopaniṣad Bhāṣya according to the Advaita school of Philosophy.

Remarks :—This Ms. abruptly ends in the commentary on the 9th Ṛk of this Upaniṣad. The other work contained herein is Chāndogyopaniṣad Bhāṣya. The Ms. is in a fairly good condition. Dr. Burnell wrongly called this work a fragment of Īśāvāsyopaniṣad.

॥ ईशावास्योपनिषद्दीपिका ॥

1441. ĪŚĀVĀSYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9753 a. Page 29. Right column. Substance—Palm leaf. Size—16½×1½ inches. Sheets—8 (1-8 out of 167). Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—175. Author—Śaṅkarānanda. Complete.

Beginning :

ईशावास्याद्यो मन्त्रा विनियुक्ता न कर्मणि ।
प्रमाणाभावतस्तेषां कुर्वे व्याख्यामकर्मणि (णाम्) ॥

ईश: ईष्ट इति ईश्वर आनन्दात्मा तेन आवास्यमाच्छादनीयं वासयोग्यं वा इदं विविधप्रत्ययगम्यं सर्वं निखिलं सर्वशब्दार्थमाह । यत्किञ्च यत्किञ्चिदिति भूतं भौतिकं जगत्यां ब्रह्माण्डकटाहभूमौ जगच्चेतनाचेतनात्मकं ईश्वर एवेदमिति बुद्धिः करणीयेत्यर्थः । तद्बुद्ध्युत्पादे साधनमाह— तेन जगता त्यक्तेन तद्बुध्या गृहीतेन भुञ्जीथाः । ईश्वरतत्त्वसाक्षात्कारलक्षणं भोजनं कुर्याः । जगद्बुद्धेरनुत्पादे सर्वसङ्गपरित्यागलक्षणमुपाय[पाय]माह । मागृधः माभिलाषं कार्षीः ॥

End :

उपास्यां देवतां सम्प्रार्थ्य कर्मसाधनभूतां देवतां प्रार्थयते । अग्ने हे अग्ने नय प्रापय सुपथा सम्यङ्मार्गेण राये स्वर्णार्थे अस्मान् समुच्चयानुष्ठातॄन् विश्वानि सर्वाणि देव हे देव वयुनानि ज्ञानानि विद्वान् जानन् युयोधि वियोजय अस्मदुपासकेभ्यः जुहुराणं कुटिलं एनः पापं भूयिष्ठां अतिशयेनाधिकां ते तुभ्यं नमउक्तिं नमस्कारो [भूत्वो]क्तिं विधेम विधास्यामः सर्वदा कुर्म इत्यर्थः । एते अवच्चिंति ॥१८॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजका(चा)र्यानन्दात्मपूज्यपादशिष्यश्रीशङ्करानन्दभगवत्कृतिरीशावास्योपनिषद्दीपिका समाप्ता[:] ॥

Subject : Īśāvāsyopaniṣad dīpikā—an independent commentary on Īśāvāsyopaniṣad, bringing out the tenets of Advaita Philosophy therein.

Remarks:—The Ms. is in good condition. This Ms. contains the following works:

1. ईशावास्योपनिषद्दीपिका ॥
2. केनोपनिषद्दीपिका ॥
3. प्रश्नोपनिषद्दीपिका ॥
4. मुण्डकोपनिषद्दीपिका ॥
5. माण्डूक्योपनिषद्दीपिका ॥
6. ऐतरेयोपनिषद्दीपिका ॥
7. तैत्तिरीयोपनिषल्लघुदीपिका ॥
8. ब्रह्मोपनिषद्दीपिका ॥
9. वेदान्तोपनिषत्कारिका ॥

॥ ईशावास्योपनिषद्दीपिका ॥

1442. ĪŚĀVĀSYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 b. Page 29. Right column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—2 (13 & 14 out of 69). Lines—12 or 13 to a Page. Script—Telugu. No. of Granthas—175. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1441.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

॥ ईशावास्योपनिषद्भाष्यटिप्पणम् ॥

1443. ĪŚĀVĀSYOPANIṢAD BHĀṢYAṬIPPAṆAM.

J. L. Collection No. 154. Substance—Paper. Size—9×4 inches. Sheets—7. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Śivānandayatīśa (?). Incomplete.

Beginning:

श्रीमृत्युञ्जयाय नमः

येनात्मना परेणेशव्याप्तं विश्वमशेषतः ।
सोहं देहद्वयी साक्षी वर्जितो देहतद्गुणैः ॥ १ ॥

ईशावास्यमित्यादिमन्त्रान्व्याचिख्यासुर्भगवान् भाष्य-कारस्तेषां कर्मशेषत्वशङ्कां तावन्नुदस्यति । तथा हि—कर्मजडाः केचन मन्यन्ते स्म ईशावास्यमित्यादयो मन्त्राः कर्मशेषाः मन्त्रत्वात् इषेत्वेत्यादिमन्त्रवत् । अतः पृथक्प्रयो-जनाद्यभावादव्याख्येया इति । तान्प्रत्याह । ईशावास्य-मित्यादय इति । इषे त्वेत्यादिशाखां छिनत्तीत्यादिवद्वि-नियोजकप्रमाणादर्शनात्प्रकरणान्तरत्वाच्चेत्यर्थः ॥

End:

काठके विरोधश्रवणादविरोधो भविष्यतीति न वाच्यम् । विरोधाविरोधयोः सिद्धत्वेन विकल्पासम्भवादुदितानुदि-तहोमयोर्हि पुरुषतन्त्रत्वाद्युक्तो विकल्प इत्युक्तम् । तर्ह्यवि-रोध एवास्तु । समुच्चयबलादिति चेन्न । मुख्यब्रह्मविद्यावि-द्ययोर्भक्तिविद्याविद्ययोरिव सहसम्भवानुपपत्तेः । समुच्चय-विधिरसिद्धिः(?)सिद्धसमुच्चयविधौ तद्बलादविरोधसिद्धि-रविरोधावगमाच्च समुच्चयसिद्धिरि... ॥

Colophon : Nil.

Subject: Īśāvāsyopaniṣad Bhāṣyaṭippaṇa—a gloss on Śrī Śaṅkarācārya's bhāṣya on this Upaniṣad.

Remarks :—The Ms. is old and is in good condition. In the third Volume of the Oriental Mss. Library Catalogue Madras, this commentary is ascribed to one Śivānandayati. [See Pages 303-5. Vol III]. The Ms. breaks off in the commentary on the Bhāṣya of the 14th verse of this Upaniṣad.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1444. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 h. Page 29. Right column.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—29 (230-255 out of 255). Lines—6 to a Page. Script—Grantha. No. of Granthas—525. Author—Śaṅkarācārya. Complete.

Beginning :

परिसमाप्तं कर्म सहापरब्रह्मविषयविज्ञानेन । ए(सै)षा कर्मणो ज्ञानसहितस्य परा गतिरुक्तविज्ञानेन द्वारेणोप(सं)-हृता (ए)तत्सत्यं ब्रह्म प्राणाख्यं । एष तु देवस्तस्यैव प्राणस्य सर्वे देवा विभूतयः । एतस्य प्राणस्यात्मभावं गच्छन् देवता अप्येतीत्युक्तम् । सोयं देवताप्ययलक्षणः (परः)पुरुषा-र्थ(ः) । [विष](एष)मोक्षः । स चायं यथोक्तेन विज्ञानेन कर्मसमुच्चयसाधनेन (ज्ञानकर्मसमुच्चयेन साधनेन) प्राप्तवो-(व्यो) नातः परमस्त्ये(स्ती)त्येके पतिपन्नास्तां निराचि-कीर्षन्नुत्तरं केवलात्मविद्याविधानार्थमात्मा वा इदमित्या-द्याह । कथं पुनरकर्मसम्बन्धिकेवलात्मविज्ञानविधानार्थ इत्युत्तरो ग्रन्थ आरभ्यते । अन्यार्था[र्था]नवगमात् । तथा च पूर्वोक्तानां देवतानामग्न्यादित्यादीनां संसारित्वं दर्श-यिष्यत्यशनायादिदोषवत्त्वेन— 'तमशनया' ० इत्या-दिना ॥

End :

स वामदेवो(ऽ)न्यो वा एवमेतं यथोक्तं ब्रह्म वेद प्रज्ञेना-त्मना एते(ये)नैव प्रज्ञात्मना पूर्वे विद्वांसो अमृता अभूवन् । तया(था)यमपि विद्वान् एतेनैव प्रज्ञेनात्मनास्माल्लोकादुत्क्र-म्येत्यादि व्याख्यातम् । अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा(ऽ)मृतः समभवत्समभवदित्यो-मिति ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमत्परमपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृत(तौ) बह्वृचब्राह्मणोपनिषद्भाष्यं समाप्तम् ॥ ओं तत्सत् । अस्मद्गुरुभ्यो नमः ॥

Subject: Aitareyopaniṣad bhāṣya belonging to the **Advaita** school of Philosophy. 1-4 Adhyāyas.

Remarks :—For the other works contained herein see Remarks on No. 1438. The Ms. is in a fairly good condition.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1445. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9754 h. Page 30. Left column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—6 (34-39 out of 69). Lines—14 to a Page. Script—Telugu. No. of Granthas—500. Author—Śaṅkarācārya. **Complete.**

Beginning, end, colophon and subject—Same as No. 1444.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428. Dr. Burnell wrongly observes that this work is the Aitareyopaniṣad bhāṣya by Saṅkarānanda. Evidently it is the bhāṣya of Śri Śaṅkarācārya.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1446. AITAREYOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 i. Substance—Paper. Size—$12\frac{3}{4} \times 7\frac{3}{4}$ inches. Sheets—9. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1444.

Remarks:—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1439.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1447. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6330. Page 30. Left column. Substance—Paper. Size—9×4 inches. Sheets—27. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—525. Author—Śāyaṇācārya. Complete.

Beginning:

श्रीगणेशाय नमः । सरस्वत्यै नमः ॥

इत्थमध्यायत्रयेण प्राणविद्या प्रपञ्चिता । एतावता ब्रह्मविद्यायां पुरुषस्य मुख्याधिकारः सम्पन्नः । कर्मकाण्डोक्तैः कर्मभिः विविदिषायाः सम्पन्नत्वात् । उपासनया चित्तैकाग्र्यस्य सम्पन्नत्वाच्च । तत्सम्पत्तौ दमशमादयो गुणा (अ)प्यर्थसिद्धाः । ते चात्मविद्यायामन्तरङ्गभूताः । 'शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वाऽत्मन्येवात्मानं पश्ये'दिति श्रुतेः ॥ ततो मुख्याधिकारिणमुपलभ्य श्रुतिरध्यायत्रयेण ब्रह्मतत्त्वं विस्पष्टमुपदेष्टुं आदौ तत्त्वसङ्ग्रहेण सूत्रयति—आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषत् इति । आत्मशब्दस्यार्थो महर्षिभिरेवं स्मर्यते ।

यच्चाप्नोति यदादत्ते यच्चातिविषयानिह ।
यश्चास्य सन्ततो भावः तस्मादात्मेति कीर्तितः ॥

द्विविधो ह्यात्मा व्यवहारविशिष्टः केवलश्चेति । व्यवहारस्त्रिविधः ॥ जागरणं स्वप्नः सुषुप्तिश्चेति ॥

End :

ऋतं मानसं सत्यं वा चिरं मनसा वस्तुतत्त्वं विचार्य वाचा वदिष्यामीत्यर्थः । तन्मया वक्ष्यमाणं ब्रह्मतत्त्वं मां शिष्यं अवतु सम्यग्बोधेन पालयतु । तथा च तद्ब्रह्म तद्वक्तारं । आचार्यमवतु । बोधकतत्त्वसामर्थ्येन पालयतु । पुनरप्यवतु मामित्युक्तिः फलविषयपूर्वसाधनकाले च शिष्याचार्ययोः पालनं प्रार्थितं । इदानीं फलकालेपि प्रार्थ्यते । शिष्यस्य विद्यातत्कार्यानिवृत्तिः आचार्यस्य तादृशशिष्यदर्शनेन विद्यासम्प्रदायप्रसिद्धिं प्रयच्छति प्रयुक्तः परितोषः फलं । अनेन मन्त्रपाठेन विद्योत्पत्तेः पुरा विद्याप्रतिबन्धका विघ्नाः परिह्रियन्ते विद्योत्पत्तेरूर्ध्वं असम्भावनाविपरीतभावनोत्पादि(त)विघ्नाः परिह्रियन्ते ॥ अवतु वक्तारमित्यभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

Colophon :

इति श्रीसायणीया(णा)चार्यविरचिते वेदार्थप्रकाशे
आरण्यकाण्डे सप्तमोऽध्यायः ॥

श्रीभवानीशङ्करार्पणमस्तु ॥

Subject : Aitareyopaniṣadbhāṣya. Vedārtha Prakāśa. A commentary on 4-7 Adhyāyas of Aitareyāraṇyaka.

Remarks :—The Ms. is in good condition, though one edge of the sheets is completely rat-eaten.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1448. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9747. Page 30. Left column.
Substance—Palm leaf. Size—12⅛×1 inches. Leaves—32.

Lines—5 to a Page. Script—Telugu. No. of Granthas—525. Author—Śāyaṇācārya. Complete.

Beginning :

श्री सामराजगुरुभ्यो नमः ॥

क्रोधनाब्दे मार्गशीर्षकृष्णपक्षचतुर्दशीम् ।

इन्दुवासरमारभ्य एकोजेः प्रथमाब्दिकम् ॥

इत्थमध्यायत्रयेण० ॥ Same as No 1447.

End and subject—Same as No. 1447.

Colophon :

इति सायणीय(णाचार्य)विरचिते वेदार्थप्रकाशे

आरण्यकाण्डे(के)सप्तमोऽध्यायः ॥

एकोजिभूपतनुजे अवत्यवनिमण्डलम्

क्रोधनाब्धे पौषमासि शुक्लप(पा)ञ्चमिके तिथौ ।

वेङ्कटाध्वरिपौत्रेण कोण्डयार्यतनूभुवा ।

ऐतरेयोपनिषदो भाष्यं वेङ्कटयज्वना ॥

लिखितं यद्बद्धं वा सुबद्धं क्षन्तुमर्हथ ॥

श्रीसामराजगुरुभ्यो नमः । महादेवीसहायं ।

श्रीवेङ्कटाद्रिसहायम् ॥

Remarks :—The Ms. is in a fairly good condition. The Ms. is dated the fifth day after the new moon in Pauṣa month in Krodhana year when King Sāhaji, the son of King Ekoji, was ruling at Tanjore. It exactly corresponds to Śaka 1607 or Monday 18th January 1686 A. D.

The scribe of this Ms. is known as Veṅkaṭa yajvan, son of Koṇḍayārya, grandson of Veṅkaṭādhvarin.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1449. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9750. Page 30. Left column.

Substance—Palm Leaf. Size—16 × 1¼ inches. Leaves—20. Lines—7 to a Page. Script—Telugu. No. of Granthas —525. Author—Sāyaṇācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1448.

Remarks :— The Ms. is old and is in a fairly good condition.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1450. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9753 f. Page 30. Left column.
Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—23 (85-107). Lines—6 to a Page. Script—Telugu. No. of Granthas—525. Author—Sāyaṇācārya. Complete.

Beginning—Same as No. 1447.

End :

अथ तत्त्वज्ञानफलं दर्शयति । स एतेन प्रज्ञानेनात्मना ऽस्माल्लोकादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान्कामा- नाप्त्वामृतः समभवत् यः पुमान् प्रज्ञानं ब्रह्मेत्येव जानाति स पुमान् तेन प्रज्ञानेनात्मा चे(चै)तन्यस्वरूपेण स्वयमा- विर्भवति तदूर्ध्वं विदेहमुक्तिं प्रपद्यते । तन्मुक्तिप्रतिपा- दकं 'अस्माल्लोका' दित्यादि वाक्यं पूर्वस्मिन् पञ्चमाध्याये व्याख्यातम् । तस्य वाक्यस्य पुनरप्यत्रोक्तिर्विद्योपसंहा- रार्था समभवदित्यभ्यासोऽध्यायसमाप्त्यर्थः ॥

Colophon :

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशके
ऐतरेयारण्यकाण्डे द्वितीयारण्यकाण्डे
षष्ठोऽध्यायः ॥

Subject : Aitareyopaniṣadbhāṣya. Vedārthaprakāśa a commentary. 1-6 Adhyāyas of Aitareyāraṇyaka.

Remarks :— In this Ms. the Seventh Adhyāya which is only the commentary on the Śānti: "वाङ्मे मनसि" is omitted.

The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1441.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

1451. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 659½. Page—30. Left column. Substance—Paper. Size—9½ × 4¼ inches. Sheets—26. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —250. Author—Vidyāraṇya(?) Complete.

Beginning :

श्रीगणेशाय नमः ॥

नमस्कृत्य हरिं शम्भुं ब्रह्माणं भास्करं गुरुम् ।
वच्मि संक्षेपतो विद्यामात्मषट्कप्रदीपिकाम् ॥

स्वकर्मपूतस्तनुभागतन्द्रो
निरस्तसूक्ष्मां०भवोनुमेदः ।
पुण्यैरगण्यः परिपूर्णचन्द्रो
मोक्षं लभेत्तन्ममृतत्व(?)मिन्द्रः ॥

एवं ब्रह्मिष्ठो ब्रह्मभावाधिकारी सन् तत्त्वसङ्ग्रहं सूचयति । 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिष' दिति । आत्मशब्दार्थो महर्षिभिरवसर्यते ।

"यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इति ।

आत्मा द्विविधः परमात्मा जीवश्चेति । परमात्मा एक एव । जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च । निमायावान् ब्रह्मेतिश्रुतिः ।

End—Same as No. 1447.

Colophon :

इति विद्यारण्याचार्यविरचितबह्वृचशाकलोक्तारण्यकाण्डे वेदार्थप्रकाशदीपिकायां द्वितीयारण्यके सप्तमोऽध्यायः ॥

Subject: Aitareyopaniṣadbhāṣyadipikā — a commentary on Aitareyopaniṣad. 1—4 (4—7) Adhyāyas.

Remarks :— In the front page of this Ms. is given "पुस्तकं महाराजतुळजाराजस्य" i. e. The Ms. belonged to Tulajā Mahārāja of Tanjore between 1765—1787. The text of this Ms. is slightly different from that found in No. 1447. The Ms. is old and is in a fairly good condition. A transcribed copy of this Ms. in paper is also available in this Library. See Transcript Volume No. 404, the date of copying being 12th September 1924. T. V. No. 404. (No. 20).

॥ काठकोपनिषद्भाष्यम् ॥

1452. KĀṬHAKOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 c. Substance—Paper. Size—12¾ × 7¾ inches. Sheets—14. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—775. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

ॐ नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च ॥

अथ काठकोपनिषद्वल्लीनां सुखार्थप्रबोधनार्थमल्पग्रन्था वृत्तिरारभ्यते । सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति । उप-

निषच्छब्देन च ख्याप्विख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तु-
विषया विद्योच्यते ॥ ❀ ❀ ❀ ❀ ❀ ❀

तत्राख्यायिका विद्यास्तुत्यर्था । उशन् कामयमानः
ह वै इति वृत्तार्थस्मरणार्थौ निपातौ । वाजमन्नं । तद्दा-
नादिनिमित्तं श्रवः यशो यस्य वाजश्रवाः । रूढितो वा
तस्यापत्यं वाजश्रवसः । स किल विश्वजिता सर्व-
मेधेनेजे । तत्फलं कामयमानः स च तस्मिन्क्रतौ सर्व-
वेदसं सर्वस्वं धनं ददौ दत्तवान् ॥

End :

किञ्च तेजस्विनौ तेजस्विनोरावयोः यदधीतं तत्स्व-
धीतमस्तु । अथ वा तेजस्विनात्रावाभ्यां यदधीतं तदतीव
तेजस्वि वीर्यवदस्त्वित्यर्थः । मा विद्विषावहै शिष्या-
चार्यावन्योन्यं प्रमादकृतान्यायाध्ययनाध्यापनदोषनिमि-
त्तं द्वेषं मा करवावहै इत्यर्थः । शान्तिः शान्तिः शान्ति-
रिति त्रिर्वचनं सर्वदोषोपशमनार्थोपनिषत्समाप्त्यर्थमि-
त्योमिति ॥ ५ ॥

Colophon :

इति श्रीमत्परमहंस + कठवल्युपनिषद्भाष्ये
द्वितीयोऽध्यायः ॥ २ ॥
श्रीशालीवाहनशके १७७८ नलसंवत् ॥
श्रीलक्ष्मीनृसिंहाय नमः ॥

Subject : Kaṭhopaniṣadbhāṣya, according to the Advaita system of Philosphy. 1 & 2 Adhyāyās.

Remarks :— The Ms. is old and is in good condition. The handwriting is beautiful. The Ms. is dated Śaka 1778 in Nala year or 1856 A. D. For the other works contained in this Ms. see the list under Remarks on No. 1439.

॥ काठकोपनिषद्भाष्यम् ॥

1453. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6538. Page 30. Left column.
Substance—Paper. Size—$13\frac{7}{8}\times5\frac{7}{8}$ inches. Sheets—53.
Lines—7 to 9 to a Page. Script—Devanāgarī. No. of
Granthas—160+775. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 1452.

Colophon:

इति श्रीमत्परमहंस + द्वितीयाध्यायः ॥ कठवल्ली समाप्तोपनिषत् ॥

Remarks;—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The Upaniṣad text also is fully given in this Ms.

॥ काठकोपनिषद्भाष्यम् ॥

1454. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 c. Page 30. Left column.
Substance—Palm leaf. Size—$17\frac{1}{4}\times1\frac{1}{2}$ inches. Leaves—38
(40-77 out of 255). Lines—6 to a Page. Script—Grantha.
No. of Granthas—770. Author—Śaṅkarācārya. Incomplete.

Beginning:

उपनिषच्छब्देन(ब्द)वाच्यां वक्ष्यमाणलक्षणां विद्या-
(मुपग(स)द्य(उपगम्य) तन्निष्ठतया निश्चयेन शीलयन्ति ।
तेषामविद्यादयः संसारबीजस्य विशरणात् विस्रंसनात्
विनाशना(दित्यनेन)अर्थयोगेन विद्योपनिषदित्युच्यते ।
तथा च वक्ष्यति । "निचाय्य तं मृत्युमुखात्प्रमुच्यत"
इति । पूर्वोक्तविशेषणान्मुमुक्षून् प्रति(परं)ब्रह्म(गमय-
तीति च ब्रह्मग)मयितृत्वेन योगात् ब्रह्मविद्योपनिषदित्यु-
च्यते । तथा च वक्ष्यति । 'ब्रह्मप्राप्तो विर(जो)ऽभूद्वि-

मृत्युः ' इति । लोकादिब्रह्मजिज्ञा(जज्ञो) योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ(र्थ्य)मानाया(ः) स्वर्गलोकपद-प्राप्तिहेतुत्वेन गर्भवान(स)जन्मजराद्युपद्रववृन्दस्य लोका-न्तरेऽपि पौनःपुन्येन प्रवृत्तस्य अवसादयितृत्वेन शैथि-ल्यापादनेन वा धात्वर्थयोगादग्निविद्याप्युपनिषदित्युच्यते ॥

End and subject—Same as No. 1452.

Colophon : Nil.

श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीदक्षिणामूर्तये नमः ॥ हरिः ॐ ॥

ग्रन्थसङ्ख्या सप्तत्युपरि सप्तशतम् ॥

Remarks :—For the other works contained herein see the list under Remarks on No. 1438. Only a few lines are wanting in the beginning of this Ms.

The Ms. is in a fairly good condition.

॥ काठकोपनिषद्भाष्यम् ॥

1455. KAṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9754 a. Page 30. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—12 (1-12 out of 69). Lines—10 or 11 to a Page. Script—Telugu. No. of Granthas—770. Author—Śaṅkarācārya. Incomplete.

Beginning and subject—Same as No. 1452.

End :

अथ शिष्याचार्ययोः प्रमादकृतान्यायेन विद्याग्रहणप्र-तिपादननिमित्तदोषप्रशमनार्थेयं शान्तिरुच्यते —

सह नौ आवां अवतु पालयतु विद्यास्वरूपप्रकाशनेन । कः? स एव परमेश्वरः उपनिषत्प्रकाशितः । किञ्च, सह

नौ भुनक्तु तत्फलप्रकाशनेन नौ पालयतु । सहैव आवां विद्याकृतं वीर्यं सामर्थ्यं करवावहै । निष्पादयावहै । . . ॥

Colophon: Nil.

Remarks :— For the other works contained herein see the list under Remarks on No. 1428. Only a few lines are wanting at the end. Dr. Burnell wrongly observed that this work is Koṭhopaniṣaddīpikā.

The Ms. is in good condition.

॥ केनोपनिषद्भाष्यम् ॥

1456. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6537. Page 30. Right column. Substance—Paper. Size—$13\frac{3}{8} \times 5\frac{7}{8}$ inches. Sheets—32. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —400. Author—Śaṅkarācārya. Complete.

Beginning:

॥ श्रीगणेशाय नमः ॥

'केनेषित'मित्याद्युपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः । प्रागेतस्मात्कर्माण्यशेषतः परिसमापितानि । समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि । कर्माङ्गसामविषयाणि च ॥

❀ ❀ ❀

'आचार्यवान्पुरुषो वेदाचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदिति', 'तद्विद्धि प्रणिपातेने'त्यादि श्रुतिस्मृतिनियमाच्च कश्चिद्गुरुं ब्रह्मनिष्ठं विधिवदुपेत्य प्रत्यगात्मविषयादन्यत्र शरणमपश्यन्नभयं नित्यं शिवमतु(च)लमिच्छन्पप्रच्छेति कल्प्यते । केनेषितामित्यादि ॥

End

'अमृतत्वं हि विन्दते' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगम्यते (मयति)। अपहत्य पाप्मानमविद्याकामकर्मलक्षणं संसारबीजं विधूयानन्तेऽपर्यन्ते स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत्। अनन्ते अपर्यन्ते स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत्। अनन्ते इति विशेषणाच्च त्रिविष्टपेऽनन्तशब्द औपचारिकोऽपि स्यादित्यत आह— ज्येय इति। ज्येये ज्यायसि सर्वमहत्तरे स्व आत्मनि मुख्ये एव प्रतितिष्ठति। न पुनः संसारमापद्यत इति अभिप्रायः॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृतौ केनोपनिषद्भाष्यं समाप्तम्॥

Subject : Kenopaniṣadbhāṣya—Padabhāṣya, according to the Advaita school of Philosophy.

Remarks :—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The paper is of English manufacture.

॥ केनोपनिषद्भाष्यम्॥

1457. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 b. Page 30. Right column.
Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—25 (15-39 out of 255). Lines—5 to a Page. Script—Grantha. No. of Granthas—400. Author—Śaṅkarācārya. **Complete.**

Beginning, end and subject—Same as No. 1456.

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्य परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवतः कृतौ तलवकारोपनिष-

ख्शुद्रविवरणे न(व)मोऽध्यायः ॥

श्रीसाम्बशिवाय नमः । श्रीगणपाय नमः ।

ग्रन्थसङ्ख्या चतुश्शतम् ।

Remarks:—For the other works contained herein see the list under Remarks on No. 1438. The Ms. is in good condition.

॥ केनोपनिषद्भाष्यम् ॥

1458. KENOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 b. Substance—Paper. Size—$12\frac{7}{8} \times 7\frac{3}{4}$ inches. Sheets—8. Lines—15 or 16 to a page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1456.

Remarks:—The Ms. is old and is in good condition. The Paper is blue in colour and bears the watermark year 1833. For the other works contained in this Ms. see the list under Remarks on No. 1439.

॥ केनोपनिषद्भाष्यम् ॥

1459. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6318. Page 30. Left column. Substance—Paper. Size—$11 \times 4\frac{1}{2}$ inches. Sheets—16. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—395. Author—Śaṅkarācārya. Incomplete.

Beginning and subject—Same as No. 1456.

End :

'अश्वमेधसहस्रश्च सत्यञ्च तुलया धृतम् ।

अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥'

सत्यमेव विशिष्यत इति । यो वै एतां ब्रह्मविद्यां के-

नेषितमित्यादिना यथोक्तामेवं महाभागां 'ब्रह्म ह देवेभ्य' इत्यादि प्रस्तुतां सर्वविद्याप्रतिष्ठातां(ष्ठां) वेद। 'अमृतत्वं हि विन्दत' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगम्यते— अपहत्य पाप्मानमविद्याका(मकर्मलक्षणं संसारबीजं वि-धूय०) ॥

Colophon : Nil.

Remarks :—Only a few lines are wanting at the end of this Ms. On the title page is given "तुलजाराजस्येदं पुस्तकम्" ॥ The Ms. is completely worm-eaten.

॥ केनोपनिषद्भाष्यम् ॥

Subject: Taittirīyopaniṣad bhāṣya, according to the Dvaita school of philosophy. This Ms. contains bhāṣya on Śikṣā and Ānanda vallīs only.

Remarks:—The Ms. is old and is in a fairly good condition. This Ms. breaks off towards the end of the commentary on the Brahmānanda Vallī.

॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

1628. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5892 d. Page 99. Left column. Substance—Paper. Size—10¼×4 inches. Sheets—6 (20-25). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Ānandatīrtha. A Fragment.

Beginning—Same as No. 1621.

End:

शिरस्तस्य यजुर्नामा यज्ञानां हरणात्स्मृतम् ।
यजुस्संस्थं च वा(द्व नु ऋक्सामान्तः) स्थितौ सदा ॥
(ऋग)र्चनायाः स्वीकारात्सामदोषात्समीकृतेः ।
पञ्चरात्रगतं मध्व........................ ॥

Colophon: Nil.

Subject: Taittirīyopaniṣad bhāṣya on Śikṣa and Ānanda Vallīs, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is old and is in good condition. The Ms. breaks off in the beginning of the Commentary on Ānanda Vallī. For the other works contained in this Ms. see the list under Remarks on No. 1598.

॥ तैत्तिरीयोपनिषद्भाष्यविवरणम् ॥

1629. TAITTIRĪYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5789. Page 99. Left column.

Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{8}$ inches. Sheets—18 (12-29). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Vyāsatīrtha. Incomplete (wants beginning).

Beginning :

....उताविद्वानपि कश्चन प्रेत्यामुं लोकं गच्छतीत्येकः प्रश्नः । उत ज्ञानिनः सर्वे(ऽ)पि समश्नुवन्ते(ते) । अथवा कश्चित् समश्नुत इति प्रश्नद्वयं प्रतीयते । अथातोऽनुप्रश्ना इति ॥

End :

त्रीणि रूपाणि कदोत्पन्नानीत्यपेक्षायामाह— त्रेतायामिति । स्वमहिमोक्त्यवसानमसहमानो भक्त्यतिशयं द्योतयन् भगवत्स्तुतिप्रणामाभ्यां व्याख्यां समापयति— पूर्णेति । पूर्णोदारगुणा एव धाम मूर्ति(ः) यस्य स तथोक्तः । तस्मै वेधसे परज्ञानिन इत्यशेषमतिमङ्गलं ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततैत्तिरीयोपनिषद्भाष्यविवरणं जयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृतं समाप्तम् ॥

अस्मद्गुर्वन्तर्गतहनुमद्भीमसध्वात्मकमुख्यप्राणान्तर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीनृसिंह्मः प्रीयतां ।

श्रीवेदव्यासाय नमः ॥

Subject: Taittirīyopaniṣad bhāṣya Vivaraṇa—a gloss on the bhāṣya on Brahmānanda and Bhṛgu Vallīs of this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks :—The Ms. is old and is in good condition. The Ms. abruptly begins with the beginning of the commentary on the Bhāṣya on the 6th Anuvāka of the Brahmānanda Vallī.

॥ तैत्तिरीयोपनिषद्भाष्यटीका ॥

1630. TAITTIRĪYOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5786. Page 99. Left column.

Substance—Paper. Size—9¼×4½ inches. Sheets—96. Lines—16 or 17 to a page. Script—Devanāgarī. No. of Granthas—3000. Author—Śrīnivāsācārya. Complete.

Beginning:

श्री वेदव्यासाय नमः ।

ॐ ज्ञानानन्दमुखैः सर्वैः गुणैरर्णवमिष्टदम् ।
गुर्वाराधितपादाब्जं भजेऽहं बादरायणम् ॥ १ ॥

श्रीमदानन्दतीर्थार्यचरणौ प्रणमाम्यहम् ।
रुद्रादिसर्वविबुधैः संसेव्याविष्टदौ सताम् ॥ २ ॥

श्रुतीप्सिताब्धिमामथ्य धीमन्दरमहीभृता ।
प्राप्ता न्यायसुधा येन तं जयेन्द्रमहं भजे ॥ ३ ॥

येन वेदान्तभाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्यं जयराजनिषेवकम् ॥ ४ ॥

विद्याधिराजादिमुनींस्तथा वेदेशयोगिनः ।
छान्दोग्यभाष्यसट्टीकाकर्तॄन्वन्दे निरन्तरम् ॥ ५ ॥

श्रीमध्वशास्त्रं समुदीर्यमस्मिन्विश्वासहेतोः समदर्शयन् ये ।
प्रदानसूत्रप्रतिपाद्यभावं वन्दे गुरूंस्तान्यदुवर्यसंज्ञान् ॥६॥

अथैतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
तैत्त(त्ति)रीयोपनिषदां भाष्यं व्याक्रियते मया ॥

बुधैरपि सुदुर्बोधे ग्रन्थे यन्मम साहसम् ।
तत्पारयन्तु निपुणाः गुरुपादरजःकणाः ॥ ८ ॥

इह हि विविधसांसारिकदुःखदर्शनविरक्तस्य शमद-मादिमतो मुमुक्षोरधिकारिणः आत्यन्तिकानिष्टनिवृत्तीष्ट-प्राप्तिहेतुभूतभगवत्स्वरूपज्ञापनाय प्रवृत्तापीयं तैत्त(त्ति)-रीयोपनिषदन्यथाव्याख्याननिरुद्धत्वेन न तद्ज्ञापनस-मर्थेति मन्यमानो भगवानानन्दतीर्थमुनिः तां यथावद्व्या-चिख्यासुः स्वयमन्तरायविधुरोऽपि अनवरतमीश्वरप्रवण-कायकरणवृत्तिरपि निरन्तरायं प्रारीप्सितपरिसमाप्तेः प्रच-यस्य च हेतुतयाऽविगीतशिष्टाचारपरम्परावगतमेतदुपनि-षत्प्रतिपाद्यगुणवद्भगवत्स्तुतिरूपं मङ्गलं शिष्यशिक्षार्थं कुर्व-न्नेव तच्छरणागतिं प्रार्थयते— सत्यं ज्ञानमित्याद्यप-द्येन ॥

End :

ईशानासः रुद्राद्याः । अन्ये सूरयो ज्ञानिनश्च शवसा सुखेन निराक्रन्दुः ज्ञातवन्तः । धातूनामनेकार्थत्वात् । तत् तृतीयं वपुरिति पूर्वेण सम्बन्धः । यदीय एवापादि वः प्रकृष्टः प्रकाशरूपो मध्वः आनन्दतीर्थाख्यो मातरिश्वा । मातरि प्रमाणभूत ऋगादौ श्वयति गच्छतीति मातरिश्वा वायुः गुहासन्तं जीवेश्वरैक्यं वदद्भिः गूहितं सन्तं हरिं आधवे आसमन्तात्पतित्वे मथायति मश्नाति । शास्त्रेण विचार्य निश्चाययतीति भावः । प्रयत्पितुः(?) भ........ ।

.... श्रीनिवासाख्यसूरिणा ॥

तैत्तिरीयोपानिषदो भाष्यस्य....... ध्वयोः ॥

वेदेशतीर्थादि...... निबन्धोऽत्र विचार्यते ॥

Colophon :

इति श्रीमदानन्दतीर्थभ.........ष्यस्य टीकायां श्रीमद्यदु...
रचितायां पदार्थदीपिका.........र्णमस्तु ॥ श्रिये नमः ॥

(Sheet No. 25) इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्री-
मत्तैत्त(त्ति)रीयोपनिषद्भाष्यस्य टीकायां श्रीमद्यदुपत्याचार्य-
पूज्यपादाराधकेन श्रीनिवासेन रचितायां पदार्थदीपिका-
ख्यायां शिक्षा समाप्ता ॥

Subject—Taittirīyopaniṣadbhāṣya Tīkā otherwise known as Padārtha dīpikā, according to the Dvaita school of Philosophy. This Ms. contains commentary on the bhāṣya on the three Vallīs of this Upaniṣad.

Remarks :—The Ms. is old and is in a fairly good condition. The sheets are damp in appearance. One half of the last sheet is lost and as such, a few words are wanting at the end of this Ms. A Transcribed copy of this Ms. in paper is also available in the Library. See Transcript Volume No. 427, the date of copying being 28th February 1926. T. V. No. 427 (No. 21).

The author of this work is known as Śrīnivāsācārya, a pupil to Śrī Yadupatyācārya. (See colophon above).

॥ तैत्तिरीयोपनिषद्भाष्यविवरणम् ॥

1631. TAITTIRĪYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5787. **Page** 99. Left column. **Substance**—Paper. **Size**—$9\frac{3}{4} \times 4\frac{1}{8}$ inches. **Sheets**—91. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—?. Complete.

Beginning :

श्रीमदानन्दतीर्थादिसमस्तगुरुभ्यो नमः ।
सृष्ट्यादिकारणं पूर्णगुणपञ्चादिरूपिणम् ।
वन्दे श्रीरमणं पूर्णबोधादिगुरुचारिणम् ॥

श्रीरस्तु । निर्विघ्नमस्तु । ॐ भगवानानन्दतीर्थमुनिः तैत्त(त्ति)रीयोपनिषदं यथावद्व्याचिख्यासुः विशिष्टेष्टाधिकृतभगवच्चरणप्राप्त्याशासनरूपमङ्गलं विप्रकृष्टशिष्यानुजिघृक्षयाऽनुतिष्ठति— सत्यमिति । अत्र सत्यादिविशेषणैर्वन्द्यत्वप्रयोजकीभूतं विशिष्टत्वं अधिकृतत्वं च ब्रह्मण उच्यते । सुप्रेष्ठमित्यत्यन्तेष्टत्वं । तत्र जगत्सद्भावया(व्या)पकत्त्वादिगुणवतो विशिष्टत्वं स्फुटं ॥

End :

तस्मै परस्मै ब्रह्मणे नमः । इति च त्रीणि रूपाणि उदितानीत्यनुवृत्त्यार्थः । स्वमहिमोक्त्या समापनमयुक्तं मन्यमानो भक्त्यतिशयवशात्पुनर्भ(ग)वत्स्तुतिनती विधत्ते— पूर्णेति । प्रत्येकं पूर्णागण्यगुणैरुदारमुत्कृष्टं धाम स्वरूपं यस्य तस्मै वेधसे जगत्सृष्ट्यादिकर्त्रे प्रेयसे स्वतिप्रियाय ।

नारायणादिरूपेण वासुदेवादिना स्थितः ।
लोकादौ पूर्ववर्णादौ प्रीतः स्याद्वायुवल्लभः ॥
यदुपत्याचार्यशिष्येण अप्य(प्प)णाचार्यसूनुना ।
तैत्त(त्ति)रोपनिषद्भाष्यं व्याकृतं मध्वनिःसृतम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततैत्त(त्ति)रीयोपनिषद्भाष्यविवरणं समाप्तम् ॥

Subject: Taittirīyopaniṣad bhāṣya vivaraṇa—a gloss on Ānandatīrtha's bhāṣya on the three Vallīs of this Upaniṣad, according to the Dvaita school of philosophy.

Remarks :—The Ms. is in good condition. The author of this commentary is said to be the son of one Appaṇācārya and a pupil to Yadupatyācārya. His exact name is not known.

॥ तैत्तिरीयोपनिषद्भाष्यविवरणम् ॥

1632. TAITTIRĪYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5788. Page 69. Left column.
Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—53. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1475. Author—?. Incomplete.

Beginning, end, colophon and subject—Same as No. 1631.

Remarks:—The Ms. is in good condition. The 51st sheet in this Ms. is left out blank.

॥ तैत्तिरीयोपनिषत्खण्डार्थः ॥

1633. TAITTIRĪYOPANIṢAD KHAṆḌĀRTHAḤ.

Burnell's Catalogue No. 5790. Page 110. Left column.
Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—6 (2-7). Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Rāghavendra. Śikṣāvallī only—Incomplete.

Beginning:

...वाग्वै ब्रह्मेति श्रुतेः । वाण्यै नमति वा विरिञ्चायेति वा । तं वायुं—आधिदैविकाद्यनिष्टनिरासार्थं विरुक्तिरित्येके । ब्रह्मविद्याभ्यासार्थिनः पूर्वं शिक्षणीयमर्थं प्रतिज्ञापूर्वमाह—शीक्षामिति । शीक्ष्यन्त इति शीक्षा । शिक्षणीयमर्थं विविच्य स्पष्टं वक्ष्याम इत्यर्थः । शीक्षेति दैर्घं छान्दसम् ॥

End:

एष आदेशः । इयमाज्ञा हरेः । न केवलमाज्ञा किन्तु एष उपदेशः । नायं यादृशः तादृश उपदेशः । अपि तु एषा वेदोपनिषत् वेदरहस्यमेतत् । एतदनुशासनं शिक्षेत्यर्थः । प्रागुक्तसत्यत्वादिकमवश्यमुपास्यमिति द्वि·

रुक्त्यावधारयति । एवमुपासितव्यं प्रागुक्तसत्यवचना-

दिकं अवश्यानुष्ठेयमित्यर्थः । यया शान्त्या विद्योपक्रम्य

समापिता तामेव विघ्ननिवृत्तौ शक्तेति भावेन अन्तेऽपि

पठन्ति—शन्नो मित्र इति । अत्र वायोः त्वामेव प्रत्यक्षं

ब्रह्मावादिषमित्युक्ते(ः) । वीजं तूपक्रम एवोक्तम् ॥

Colophon:

इति प्रथमोपनिषदं (त्) ॥

Subject: Taittirīyopaniṣad khaṇḍārtha—a gloss on Śikṣā vallī of this Upaniṣad according to the Dvaita School of Philosophy.

Remarks:—The Ms. is old and is in an injured condition. This Ms. abruptly begins with the introductory remarks on the commentary on the Śikṣāvallī of this Upaniṣad.

॥ प्रश्नोपनिषद्भाष्यम् ॥

1634. PRAŚNOPANIṢADBHĀṢYAM.

Burnell's Catalogue No. 5841. Page 100. Right column. Substance—Paper. Size—8×4 inches. Sheet—1. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—Ānandatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

नमो भगवते तस्मै प्राणादिप्रभविष्णवे ।

अमन्दानन्दसान्द्राय वासुदेवाय वेधसे ॥ १ ॥

प्रजानां पालनाद्विष्णुः प्रजापतिरितीरितः ।

स वायुं सूर्यनामानं चन्द्रनाम्नीं सरस्वतीम् ॥ २ ॥

सूर्याचन्द्रगतौ देवः ससर्ज पुरुषोत्तमः ।
तावाविश्य स्वयं विष्णुः सर्वसृष्टीः करोत्यजः ॥ ३ ॥

*　　*　　*　　*　　*

दम्पत्योर्भगवान्विष्णुः भार्यास्था तु सरस्वती ।
भर्तृस्थः स स्वयं वायुरेवं जानन्विमुच्यते ॥

इति प्रजापतिसंहितायाम् ॥ १ ॥

वायुरग्निरित्यत्र भूतवायुरुच्यते ।
प्राणशब्देन मुख्यवायुः ॥ २ ॥

End :

अनन्तं वै नामानन्ता वै विश्वेदेवा इति नामरूपयोरन-न्तत्वं श्रुतिर्वक्ति— यत्र पूर्वे साध्यास्सन्ति देवाः । स तत्र पर्येति जक्षन् क्रीडन् रममाणः । सोऽश्नुते सर्वान्का-मान्सह ब्रह्मणा (विपश्चिता) । ऋचां त्वः पोषमास्ते पुपु-ष्वान्गायत्रं त्वो गायति शक्करीषु इत्यादेश्च । अतः सर्वमु-क्तेभ्योऽप्युत्तमोत्तमः परिपूर्णो नारायण इति सिद्धम् ॥

नमो नमोऽस्तु हरये प्रेष्ठप्रेष्ठतमाय ते ।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥

Colophon :

इति श्रीमदानन्द(तीर्थ)भगवत्पादाचार्यविरचितं षट्प्रश्नोपनिषद्भाष्यं समाप्तम् ॥

Subject : Praśnopaniṣad bhāṣya, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is old and is in good condition. The letters are too small yet are legible.

॥ प्रश्नोपनिषद्भाष्यम् ॥

1635. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5874. Page 100. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—5. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas —45. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1634.

Remarks:—The Ms. is in good condition.

॥ प्रश्नोपनिषद्भाष्यम् ॥

1636. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5875. Page 100. Right column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheet—1. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1634.

Remarks:—The Ms. is very old and is in a dacaying condition.

॥ प्रश्नोपनिषद्भाष्यम् ॥

1637. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 b. Page 100. Right column. Substance—Paper. Size—$9\frac{1}{8} \times 4$ inches. Sheets —3 (4-6). Lines —10 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1634.

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1574.

॥ प्रश्नोपनिषद्भाष्यम् ॥

1638. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6222. Page 100. Right column. Substance—Paper. Size—7⅛×2 inches. Sheets—6. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1634.

Colophon : Nil.

कालयुक्तनामसंवत्सरे अधिकभाद्रपदशुद्धचतुर्दश्यां भार्ग(व)

वासरे षट्प्रश्नोपनिषद्भाष्यं समाप्तं । ग्रन्थसङ्ख्यया ४५ ॥

Remarks :—The Ms. is old and is in good condition. The Ms. is dated Friday—fourteenth day after full moon—in Adhika Bhādrapada month which might be Adhika Āśvina month in Kālayukta year which corresponds to Śaka 1660 or 15th September 1738 A. D. See also the date given in No. 1625.

॥ प्रश्नोपनिषद्भाष्यविवरणम् ॥

1639. PRAŚNOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5876. Page 100. Right column. Substance—Paper. Size—11½×4½ inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Jayatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ।

पान्तु नः पद्मनाभस्य श्रीपदाम्बुजरेणवः ।

कमलाकबरीभारसुरभीकरणोद्यताः ॥ १ ॥

इह खलु संसारपारावारे निपतितमधिकारिणं जनं

जननी तनयमिव परमात्मतत्वज्ञानप्लवेनोद्दिधीर्षुराथर्वणी

ब्राह्मणोपनिषदितिकर्तव्यतामन्तरेण न तत्वज्ञानकरण-तामापद्यते। अतस्तदितिकर्तव्यतारूपन्यायगर्भं भाष्यं करिष्यन्नाचार्यः प्रारीप्सितपरिसमाप्त्यादिप्रयोजनामेतदुपनिषत्प्रतिपाद्यदेवताप्रणतिमादौ निबध्नाति—नम इति॥ नानिर्धारितस्वरूपस्य प्रणामो(ऽ)युक्तः। नचान्तरेण लक्षणं वस्तुनिर्धारणमतो वासुदेवस्य लक्षणमाह—प्राणादिति॥

End:

एवमाख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थमाह—नमः परमऋषिभ्यः पिप्पलादिभ्य इति। द्विर्वचनमादरार्थमिति। अत एव भाष्यकारोऽपि अन्ते भगवत्प्रणामं निबध्नाति— नम इति॥ परमश्चासावानन्दश्च परमानन्दः तस्य सम्यक् दोहनं यस्मात्सः सचासौ सान्द्रानन्दश्चासौ वपुश्च तस्मै॥

वचनप्रसूनमाला जयतीर्थाख्यभिक्षुणा [वि]रचिता।
ध्रियतां हृदये सदये कमलामहिळेन पुरुषेण॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य षट्प्रश्नोपनिषद्भाष्यस्य विवरणं जयतीर्थभिक्षुविरचितं समाप्तं॥

Subject: Praśnopaniṣad bhāṣya vivaraṇa, a gloss on Ānandatīrtha's bhāṣya on this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks: The Ms. is in good condition. The **विग्रहवाक्य** of the compound 'परमानन्दसन्दोहसान्द्रानन्दवपुष्मते' is additionally given in this Ms. as noted above in the end.

॥ प्रश्नोपनिषद्भाष्यविवरणम् ॥

1640. PRAŚNOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5877. Page 100. Right column. Substance—Paper. Size —$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—26. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Jayatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ।

अभयं परमात्मानं पूर्णं नित्यं प्रभुं हरिम् ।

वन्दे श्रियः पतिं नित्यं ब्रह्मरुद्रादिवन्दितम् ॥

श्रीगुरुभ्यो नमः । पान्तु नः— Same as No. 1639.

End, colophon and subject—Same as No. 1639.

Remarks :—The Ms. is in good condition.

॥ प्रश्नोपनिषद्भाष्यविवरणम् ॥

1641. PRAŚNOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5878. Page 100. Right column. Substance— Paper. Size—$9\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets— 18. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Jayatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1639.

Remarks :—The Ms. is old and is in good condition.

॥ प्रश्नोपनिषद्भाष्यविवरणम् ॥

1642. PRAŚNOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5891 c. Page. 100. Right column. Substance—Paper. Size—$13 \times 5\frac{1}{4}$ inches. Sheets—8 (17-

24). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Jayatīrtha. Incomplete (wants end).

Beginning and subject—Same as No. 1639.

End:

कथं वा युज्यते । न हि भिन्नयोरभेदः क्वचिद्दृष्टः । कथं च मनसः परदेवत्वमिति । अत एतद्वाक्यं समञ्जस.... व्याख्यानरूपां स्मृतिमुदाहरति— रश्मीनामिति । सुप्तिगस्य देवानामिति । तदिन्द्रियाद्यभि(भि)मानिदेवानामित्यर्थः । सुप्तिगस्य तद्देवानां चेति वा । त......... ॥

Colophon : Nil.

Remarks:—The Ms. is very old and is in a decaying condition. The Ms. breaks off in the middle. For the other works contained in this Ms. see the list under Remarks on No. 1578.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1643. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5840. Page 99. Right column. Substance—Paper. Size—8×4 inches. Sheets—56. Lines—13 to 17 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Ānandatīrtha. Complete.

Beginning:

श्रीवेङ्कटेशाय नमः ॥

प्राणादेरीशितारं परमसुखनिधिं सर्वदोषव्यपेतं
सर्वान्तस्थं सुपूर्णं प्रकृतिपतिमजं सर्वबाह्यं सुनित्यम् ।
सर्वज्ञं सर्वशक्तिं सुरमुनिमनुजाद्यैस्सदा सेव्यमानं
विष्णुं वन्दे सदाऽहं सकलजगदनाद्यन्तमानन्ददं तम् ॥

यथा तुष्टाव लक्ष्मीशं सर्गादौ चतुराननः ।
तथा जगाद सूर्याय याज्ञवल्क्याय सो(ऽ)ब्रवीत् ॥ २ ॥
वाजिरूपेण सूर्येण प्रोक्तं वाजसनेयकं ।
कण्वाय याज्ञवल्क्यो(ऽ)दात्काण्वं तेन प्रकीर्तितम् ॥ ३ ॥

इति वराहे ॥

अश्वस्वरूपो ब्रह्माभूदश्वरूपाज्जनार्दनात् ।
तत्र सन्निहितो विष्णुरश्वरूपस्स्वयंप्रभुः ॥ ४ ॥
तयोश्च प्रतिमापेभ्यो(ध्यो) यतोऽश्वोयं श्रुतौ श्रुतः ।
सर्वं जगत्तदङ्गेषु तस्मात्सन्निहितं श्रुतम् ॥ ५ ॥
तयोरङ्गेष्विदं यस्माज्जगत्सर्वं प्रतिष्ठितं । इति प्रध्याने ॥
उच्चैश्श्रवाः सन्निहितो मेध्येऽश्वे तत्र केशवः ।
तस्मिन्निदं जगत्सर्वं ब्रह्मा चोच्चैश्श्रवाः स्थितः ॥ इति सौपर्णे ।
पर्वताः सिकताश्चैव नद्यः कूपाः सरांसि च ।
हविः कपालयूपाद्या देवता एव सर्वशः ॥
तत्तन्नामैव नामैषा भिन्नानामभिमानतः ।
नामानि तान्यपि हरेः स हि सर्वगुणाधिकः ॥ इति नारदीये ॥
उषाः शिरो ब्रह्मनाम तत्वमस्यादयो(ऽ)खिलाः ।
सप्तम्यर्थाः समुद्दिष्टाः पञ्चम्यर्थास्तथा श्रुताः ॥
षष्ठ्यर्थाश्च चतुर्थ्यर्थास्तृतीयार्थाश्च सर्वशः ।
तदैक्यवाचिवच्छब्दा अपि तद्वस्ववाचकाः ॥
ऐक्यार्था नैव ते सर्वे भिन्नरूपा यतः सदा ।
ईशाङ्गवाचिनो वा स्युस्तेषामेव तदर्थतः ॥

समस्तु प्रथमा यस्मात्तद्योग्यार्थता भवेत् । इति ब्रह्मतर्के ॥

अङ्गप्रत्यङ्गशो व्याप्तो विष्णुरेव तुरङ्गमे ।
अतो विष्ण्वङ्गगं सर्वं मेध्याङ्गस्यमुदीरितम् । इति च ।

पुनरपि अश्वस्य मेध्यस्येति वचनं कस्यचिदश्वस्य एवमासीदिति इतिहासरूपेणो(ण नो)च्यते । किं तु सर्वमेध्यानामेवमिति ज्ञापनार्थं ॥

End:

पञ्चाग्निविद्यया चैव तथैव प्राणविद्यया ।
प्रजातिकर्मणा चैव तथा ज्ञानप्रदानतः ॥
आचार्यवंशविज्ञानाद्यः पूज्यः पुरुषोत्तमः ।
सर्वान्तर्यामिको नित्यो नमस्तस्मै परात्मने ॥
इति सद्भावे । (द्वितीयं ब्राह्मणं ॥ ८ ॥ २ ॥)

नित्यानन्दमनौपमं परमजं सर्वत्रगं सुस्थिरं
सर्वज्ञं प्रतिबोधमात्रममलं पूर्णं गुणैरच्युतैः ।
विश्वोत्पत्तिलयस्थितिप्रमतिसन्मोक्षे परं कारणं
प्रेष्ठं मे सततं प्रियात्प्रियतमं नित्यं सदोपास्महे ॥

* * * *

पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon:

इति श्रीमदानन्दतीर्थपादाचार्यविरचिते श्रीमद्बृहदारण्यकोपनिषद्भाष्ये (ऽ)ष्टमोऽध्यायः समाप्तः । ग्रन्थोऽयं समाप्तः ।
श्रीवेङ्कटेशार्पणमस्तु ।
बृहदर्थप्रविचारतत्परं बृहदाख्यायिकया समान्वितं ।
बृहदारण्यकभाष्यमालिखद्बृहदर्थप्रदमेष शोधकः ॥

विभवाब्दे सिते पक्षे मासि भाद्रपदे तिथौ ।

द्वितीयायां शेषनामा बृहद्भाष्यमलेलिखत् ॥

अनेन हनुमद्भीममध्वान्तर्गतश्रीसमेतसमस्तरूपी रामः प्रि(प्री)यतां ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya on the six Adhyāyas of this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1644. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5847. Page 99. Right column. Substance—Paper. Size—$13\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—43. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1643.

Colophon:

इति श्रीमदानन्दतीर्थ + भाष्ये अष्टमोऽध्यायः ॥

Remarks:—The Ms. is in good condition.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1645. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5846. Page 99. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—63. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1644.

Remarks:—The Ms. is very old and is in a fairly good condition. The letters are slowly fading away.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1646. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5887 e. Page 99. Right column. Substance—Paper. Size—13×5 inches. Sheets—60 (67—126). Lines—10 to a Page. Script— Devanāgarī. No. of Granthas—1750. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1644.

Remarks—The Ms. is very old and is in a ruined condition. For the other works contained in this Ms. see the list under Remarks on No. 1572.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1647. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6215. Page 99. Right Column. Substance—Paper. Size—7⅛×2 inches. Sheets—160. Lines —5 or 6 to a Page. Script—Devanāgarī. No. of Granthas —1750. Author—Ānandatīrtha. Complete.

Beginning and subject—Same as No. 1643.

Colophon:

इति श्रीमदानन्दतीर्थ + भाष्ये अष्टमोऽध्यायः ॥

श्रीशालिवाहनशके १६६० पिङ्गलसंवत्सरे दक्षिणायने वर्षतौ श्रावण-बहुलनवम्यां भौमवासरे श्रीमद्बृहदारण्यकोपनिषद्भाष्यं समाप्तं ॥

Remarks:—The Ms. is in good condition. The Ms. is dated Tuesday—Ninth day after the full Moon—in Śrāvaṇa Month in Piṅgala Year which corresponds to Śaka 1659 (and not Śaka 1660 as given in the colophon) which again corresponds to 9th August 1737 A. D.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1648. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue. No. 6232. Page. 99. Right column. Substance—Paper. Size—$8\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—23. Lines—20 to 22 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1644.

Remarks :—The Ms. is in good condition. Some sheets of this Ms. are gilted and some are green in colour. The letters are too small but quite legible and beautiful.

॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

1649. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5845. Page 99. Right column. Substance—Paper. Size—$7\frac{1}{2} \times 2\frac{1}{2}$ inches. Sheets—60. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Ānandatīrtha. Incomplete.

Beginning—Same as No. 1643.

End :

मनः स्थिता मनोनाम्नी बोधरूपत्त्वतो रमा ।
सैवाग्निस्थादनाग्नित्यं अग्निरित्येव गीयते ॥
हृदयं बुद्धिसंस्था सा त्वयनं हृदि यत्नतः ।
चक्षुः सा दृष्टिहेतुत्वाद्दृष्टानां लोक एव सा ॥ इति च ।

Colophon : (Sheet No. 47).

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्बृहदारण्यकभाष्ये
चतुर्थो(ऽ)ध्यायः ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya on the first five Adhyāyas according to the Dvaita school of philosophy.

Remarks :—The Ms. is old and is in a fairly good condition. The letters are slowly fading away. The Ms. breaks off towards the end of the bhāṣya on the fifth Adhyāya of this Upaniṣad.

॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

1650. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5850. Page 99. Right column. Substance—Paper. Size—11⅜ × 4 inches. Sheets—136 (6—141; Sheets 1-5 are missing). Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Vyāsatīrtha. Incomplete (wants beginning).

Beginning:

..................अपरसमुद्र इति शेषः । न केवलं भगवानश्वरूपी मेध्याश्वे तिष्ठति, किन्तर्हि देवा(दिवाहे)ष्व-पीत्युक्तं—हय इत्यादिना। तत्र भगवान्स्वयमेव हयादि-भूत्वा देवादीन्वहतीति प्रतीतिं प्रमाणेन निवारयति—स विष्णुरिति । समुद्रयुवा(एक)स्य बन्धुरित्येतद्व्याचष्टे—तदिति ॥

End:

विष्णुः केन नियत इत्यतो न केनापीत्याह—स्वयं त्विति । ब्रह्म स्वयम्भिभवति । श्रतिमिहुः(श्रुतिमाहुः) । स्वयम्भुब्रह्मसंज्ञो(ऽ)सौ । भगवन्नु(वान्) । स्वयमेव भवतीति स्वयम्भूः । स्वाश्रय इत्यर्थः । भक्त्याधिक्यात्पुनरपि भगवन्तं नमस्करोति— पूर्णेति । गुणात्मकधामत्वा-न्नित्यायेति । के ते गुणा इत(त्यु)पलक्षणत्वेन छायेति । वेधसे सर्वज्ञायेति ॥

नित्यानन्दाय हरये नित्यज्ञानबलात्मने ।
सदभीष्टफलावाप्तिकारणाय सते नमः ॥ १ ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्बृहदारण्यकभाष्यस्य टीकायां जयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृतायामष्टमोऽध्यायः ॥

समाप्ता चेयं टीका ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

Subject: Bṛhadāraṇyakopaniṣadbhāṣyaṭīkā, a gloss on Ānandatīrtha's bhāṣya on the six Adhyāyas of this Upaniṣad, according to the Dvaita school of philosophy.

Remarks:—The Ms. is in good condition. The introductory portion of the commentary is wanting in this Ms. The Ms. is full of scriptorial errors.

॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

1651. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue. No. 5849. Page 99. Right column. Substance—Paper. Size—$13\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—17. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Vyāsatīrtha. Fifth Adhyāya (Third Adhyāya) only.

Beginning:

श्रीवेदव्यासाय नमः । श्रीगुरुभ्यो नमः ।

भगवानेव सर्वोत्तमः सर्वगुणपरिपूर्णः सर्वमुमुक्षूपास्यः मोक्षद इति अध्यायद्वयोक्तमृषिमीमांसया समर्थितमित्याहानेनाध्यायेन । कुरुपाञ्चालानां देशानां । पादाः । सुवर्णस्य सङ्ख्याविशेषाः । ब्रह्मिष्ठो भगवन्निष्ठः । उदजातां

आहरत । न दध्रुषुः धैर्यवन्तो नाभूवन् ॥

End :

रातिर्दातुरित्येकवचनं समुदायापेक्षयेति भावेन व्याचष्टे— स प्रियः सर्वदातॄणामिति । तद्विद इत्यस्यार्थं दर्शयति— ज्ञानिनामिति । तद्वित्क इति जिज्ञासायां प्राप्तं तिष्ठमानस्येति तद्व्याचष्टे— ये त्विति ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य बृहदारण्यकोपनिषद्भाष्यस्य टीकायां श्रीमज्जयतीर्थपूज्यपादशिष्यव्यासतीर्थविरचितायां पञ्चमोऽध्यायः ॥

Subject: Bṛhadāraṇyakopaniṣadbhāṣya ṭīkā, a commentary on the bhāṣya on the fifth (third) Adhyāya of this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks :—The Ms. is in good condition.

॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

1652. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No.5851. Page 99. Right column. Substance—Paper. Size—$13\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—7. Lines— 10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Vyāsatīrtha. Incomplete (beginning only).

Beginning :

श्रीवेदव्यासाय नमः । हरिः ॐ ।

यो दूरो(ऽ)शेषदोषाणां पूर्णाखिलगुणात्मकः ।
प्राणादिविबुधेशस्तं वन्दे श्रीमध्ववल्लभम् ॥ १ ॥

इहामुत्रफलभोगविरक्तस्य शमदमादिमतो मुमुक्षोरधि-

कारिणो(ऽ)निष्टनिवृत्तेः परमानन्दावाप्तेश्च साधनत्वेन प्रवृत्तां काण्वीमुपनिषदं यथावद्याचिख्यासुर्भगवानानन्द- तीर्थमुनिः निर्विघ्नेन परिसमाप्त्यादिदं तदुक्त(तत्तदुक्त) गुणवत्तया भगवन्तं प्रणमति— प्राणादेरिति ॥ यः प्राणमन्तरोयमश्नतीत्यादिना प्राणादेरीशितृत्वमुक्तं । अ- थैष एव परम आनन्द इति परमसुखित्वं ॥

End :

अश्वमेधादिषु वायुर्देवोऽजा(जः) कर्तव्यस्तस्यैव तत्र प्राप्तविघ्नपरिहारक्षमत्वादिति भावेन * * * यत्कल्याणं ईश्वरप्रसादगन्धादिकं जिघ्रति तदात्मने चक्षुषि भोगः तीर्थादिदर्शनरूपः ॥

Colophon : Nil.

Subject : Bṛhadāraṇyakopaniṣadbhāṣyaṭīkā — a gloss on Ānandatīrtha's Bhāṣya on this Upaniṣad. This Ms. contains the commentary on the bhāṣya on the beginning of the First Adhyāya.

Remarks :—The Ms. is in good condition.

॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

1653. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue. No. 5773. Page. 99. Right column. Substance—Paper. Size—$11\frac{1}{4}\times4\frac{3}{4}$ inches. Sheets—303. Leaves—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas.—9000. Author—Raghūttamayati. Incomplete.

Beginning :

श्रीवेदव्यासाय नमः ।

लक्ष्मीपतिं सुखमुखैरखिलैर्गुणौघैः
पूर्णं व्यपेतनिखिलाघमचिन्त्यशक्तिम् ।
प्राणादिसर्वजगतो जनिपूर्वहेतुं
मोक्षैकहेतुमनिशं प्रणमामि विष्णुम् ॥ १ ॥

निखिलाद्वैतसिद्धान्तप्राप्ताज्ञानविनाशकः ।
श्रीमदाचार्यसूर्योऽयं दद्यात्तत्वप्रकाशनम् ॥ २ ॥

वाग्वज्रेणाच्छिनद्यो सकृदतिविवदद्वादिसन्दोहभूभृ-
त्पक्षान्धीमन्दरेण प्रमथनमकरोन्माध्वसिद्धान्तवार्धेः ।
सम्प्राप्याथो सुधां यो निखिलसुमनसः पाययामास मुक्त्यै
तं मूर्ध्ना श्रीजयार्यं सपदि बहुदृशं संयमीन्द्रं नमामि ॥ ३ ॥

येन वेदान्तभाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्यं वेदान्तार्थप्रसिद्धये ॥ ४ ॥

यो(ऽ)ध्यापयित्वा वेदांश्च माध्वसिद्धान्तमादिशत् ।
न्यासं प्रादाद्धरेः प्रीत्यै रघुवर्यगुरुं भजे ॥ ५ ॥

यत्काण्वोपनिषद्भाष्यं पूर्णप्रज्ञविनिर्मितं ।
तत्कृपालवमाश्रित्य व्याख्यास्ये तद्यथामति ॥ ६ ॥

इहामुत्रफलभोगविरक्तस्य शमादिमतो मुमुक्षोरधिका-रिणो(ऽ)निष्टनिवृत्तेः परमानन्दावाप्तेश्च साधनत्वेन प्रवृत्तां काण्वीमुपनिषदमन्यैरन्यथा व्याख्याततत्वेनाप्रवृत्तामिव म-न्यमानो यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिर्विलीन-प्रकृतितयान्तरायविधुरोपि अनवरतमीश्वरप्रवणकायकर-णवृत्तिरपि नारायणप्रणामादिकं प्रारीप्सितस्यानन्तरपरि-समाप्तेः प्रचयस्य च हेतुतयाऽविगीतशिष्टाचारपरम्परादिना-

चगतमवश्यकरणीयं शिष्यान्ग्राहयितुं ग्रन्थादौ निबध्नाति
—प्राणादेरिति ॥

End :

परमात्मस्तवननमनाभ्यामेव ग्रन्थः समापनीयो न तु
स्वस्तुत्यै(त्यै)वेति भावेन पुनर्भगवन्तं प्रणमि(मति)—
पूर्णेति । वेधसे सर्वज्ञायेत्यशेषमतिमङ्गलं ।

श्रीमदानन्दतीर्थार्यहृत्सरोजाख्यमन्दिरः ।
इन्दिराराध्यपादाब्जः प्रीयतां पुरुषोत्तमः ॥
प्रौढिप्रकाशनार्थं वा न मात्सर्यादिदोषतः ।
कृतेयं भाष्यविवृतिः किन्तु मन्दोपकारिणी ॥
बृहदारण्यभाष्यस्य विवृतिर्या कृता मया ।
तज्जन्यं पुण्यमखिलमवाप्नोति गुरुर्मम ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्बृहदारण्यक-
भाष्यस्य टीकायां श्रीमद्रघुवर्यतीर्थपूज्यपादशिष्य-
रघूत्तमयतिकृतायां परब्रह्मप्रकाशिकायामष्टमो(ऽ)ध्यायः ॥

Subject: Bṛhadāraṇyakopaniṣadbhāṣyaṭīkā otherwise known as Parabrahma prakāśikā—a gloss on Ānandatīrtha's bhāṣya on the six Adhyāyas of this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is old and is in a fairly good condition. In this Ms. sheets are numbered from 1 to 373 but nearly 75 sheets in the middle are found missing and the numbers of five sheets are repeated.

॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

1654. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5848. Page 99. Right column.

Substance—Paper. Size—10 × 4¼ inches. Sheets—345. (1—365 ; 99, 100, 276-279, 331-344.=20 sheets are missing). Lines—12 to 16 to a Page. Script—Devanāgarī. No. of Granthas — 10500. Author — Raghūttamayati. Incomplete.

Beginning, end, colophon and subject—Same as No. 1653.

Remarks :—The Ms. is old and is in a fairly good condition.

॥ बृहदारण्यकोपनिषत्खण्डार्थः ॥

1655. BṚHADĀRAṆYAKOPANIṢADKHAṆḌĀRTHAḤ.

Burnell's Catalogue No. 5852. Page 110. Left column. Substance—Paper. Size—13¼ × 5¼ inches. Sheets—86. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—3300. Author—Rāghavendrayati. Complete.

Beginning :

श्रीवेदव्यासाय नमः । हरिः ॐ ॥

कल्याणगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥ १ ॥
प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान् ।
काण्वोपनिषदर्थानां सङ्ग्रहः क्रियते मया ॥ २ ॥

अस्या उपनिषदो ब्रह्मसूर्ययाज्ञवल्का(ल्क्य)काण्वाः ऋमाइषयः । लक्ष्मीशो देवता । वाक्यरूपत्वान्न छन्दोऽन्वेषणं । अस्या उपनिषदो(ऽ)ध्यायाष्टकात्मकत्वे(ऽ)पि पूर्वाध्यायद्वयस्य विद्याधिकारार्थमश्वमेधकर्मनिरूपणपरत्वेन तद्व्याख्याय कर्मणा शुद्धान्तःकरणस्य ब्रह्मस्वरूपं निरूपइ(यि)तुं प्रवृत्तं तृतीयाध्यायादिग्रन्थसन्दर्भं व्याचख्यौ भगवान्भाष्यकारः । तथाहि— आदौ पूर्वप्रकृताश्वमेध-

यागीयाश्वनिष्ठां ब्रह्मविद्यामाह— 'उषा वा' इत्यादिना खण्डद्वयेन । यागीयाश्वः उच्चैःश्रवास्तत्र चाश्वरूपो ब्रह्मा । तत्र च तृ(हृ)द्रूपो हरिः सन्निहितः । तत्र सन्निहितयो-रश्वरूपयोः ब्रह्मविष्ण्वोरङ्गेषु जगदाश्रित्यास्तीति शिरः प्र(भृ)त्युत्तमाङ्गक्रमेणाह— उषा वा इति ॥

End:

तमेतं शिशुं ज्ञायत आहुरित्यर्थः । य एवं पुत्रोत्पाद-नप्रकारं जानतो ब्राह्मणस्य पुत्रो नरकत्राता कुमारो जात इति चतुर्थब्राह्मणं । अध्यायद्वयोक्तविद्याविद्याप्रवर्त-कपरम्परां प्रस्तावपूर्वमाह — अथ वंश इत्यादिना । अत्र पञ्चम्यन्ता उपदेष्टारः । प्रथमान्ताः उपदेश्या ज्ञेयाः । ब्रह्म स्वयं स्वतन्त्रं स्वतः सर्वज्ञमिति वा ॥

Colophon :

(Sheet No. 28) इति श्रीकाण्वोपनिषदर्थसङ्ग्रहे राघवेन्द्रकृते
तृतीयो(ऽ)ध्यायः ॥

(Sheet No. 86) इत्यष्टमोऽध्यायः ॥

अशेषगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥
श्रीमत्काण्वोपनिषदो भाष्याद्युक्तार्थसङ्ग्रहः ।
राघवेन्द्राख्ययतिना कृतस्सज्जनसंविदे ॥
श्रीकृष्णार्पणमस्तु । हरिः ॐ ॥

Subject: Bṛhadāraṇyakopaniṣadkhaṇḍārtha—a gloss on the six Adhyāyas of this Upaniṣad, according to the Dvaita school of philosophy.

Remarks:— The Ms. is in good condition, though some sheets are here and there worm-eaten.

॥ माण्डूक्योपनिषद्भाष्यम् ॥

1656. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5865. Page 100. Left column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—6. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning:

श्रीरघुनाथाय नमः ॥

पूर्णानन्दज्ञानशक्तिः स्वरूपं नित्यमव्ययं ।
चतुर्धा सर्वभोक्तारं वन्दे विष्णुं परं पदम् ॥

मण्डूकरूपिणा वरुणेन चतूरूपो नारायणः स्तूयते ।

ध्यायन्नारायणं देवं प्रणवेन समाहितः ।
मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् ॥ इति पाद्मे ।

ओमित्युक्तन्तु यद्ब्रह्म तदक्षरमुदाहृतम् ।
ओतमत्र जगद्यस्मादोँ तस्माद्भगवान्हरिः ॥
तदिदं गुणपूर्त्यैव सर्वमित्येव शब्दितम् ।
भाविभूतभवत्कालेष्वेकरूपतया हरिः ।
सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिता ॥

इति बृहत्संहितायां ।

End:

अपूर्वः करणाभावान्नाशाभावादनन्तरः ।
पराधीनस्थित्यभावादनपर उदाहृतः ॥
सर्वगत्वादबाह्यश्च तं ज्ञात्वा विप्रमुच्यते । इति च ।
परत्वमपरत्वं च विष्णोरेकस्य वै यदा ।
श्रूयते न तु सामर्थ्यभेदस्तत्र कथञ्चन ॥

अवतारस्य पूर्वत्वात्पौर्वापर्यमुदाहृतम् । इति ब्रह्मतर्के ॥
पूर्वावतारे पश्चिमावतारेऽपि पूर्ण एवेति प्रणवो (ह्यपरं)
ब्रह्मेत्यादेरर्थः ॥

एकोऽपि निर्विशेषोऽपि चतुर्धा व्यवहारभाक् ।
यस्तं वन्दे सदानन्दं विष्णुं विश्वादिरूपिणम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पाद(ाचार्य)विरचितं माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

Subject: Māṇḍūkyopaniṣad bhāṣya—according to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition.

॥ माण्डूक्योपनिषद्भाष्यम् ॥

1657. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 d. Page 100. Left column. Substance—Paper. Size—$9\frac{1}{4} \times 4$ inches. Sheets—7 (13-19). Lines—10 to a page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1656.

Remarks:—The Ms. is old and is in good condition. For the other works contained in this Ms. See the list under Remarks on No. 1573.

॥ माण्डूक्योपनिषद्भाष्यम् ॥

1658. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5889 b. Page 100. Left column.

Substance—Paper. Size—8 × 3⅞ inches. Sheets—8 (6-13). Lines—10 to 14 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1656.

Remarks :—The Ms. is in good condition. The other work contained in this Ms. is Ānandatīrtha's Kāṭhakopaniṣadbhāṣya.

॥ माण्डूक्योपनिषद्भाष्यम् ॥

1659. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5890 b. Page 100. Left column. Substance—Paper. Size—12½ × 5 inches. Sheets—5 (2-6.) Lines— 12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1656.

Remarks :—The Ms. is old and is in good condition. The other work contained in this Ms. is Ānandatīrtha's Kenopaniṣadbhāṣya.

॥ माण्डूक्योपनिषद्भाष्यम् ॥

1660. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6220. Page 100. Left column. Substance—Paper. Size—7⅛ × 2 inches. Sheets—13. Lines —6 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end and Subject—Same as No. 1656.

Remarks :—The Ms. is old and is in good condition.

॥ माण्डूक्योपनिषद्भाष्यटीका ॥

1661. MĀṆḌŪKYOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's :Catalogue No. 5866. Page 100. Left column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—330. Author—Vyāsatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ।

नेत्राग्रादिस्थितो(ऽ)वस्थाः जाग्रदाद्याः प्रवर्तयन् ।
विश्वादिरूपी भगवान्यस्तं वन्दे श्रियः पतिम् ॥

इहामुत्रफलभोगविरक्तस्य शमादिमतो मुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टावाप्तिसाधनभगवत्प्रतिपादिकां माण्डूकोपनिषदं यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिः समि(मी)हितसमाप्त्यादिसाधनतयावसितं मङ्गळाचरणमादौ कार्यमिति सूचयंस्तदुक्तगुणवन्तमुपश्लोकयन्प्रणमति—पूर्णेति ॥ आनन्दमय इति पूर्णानन्दत्वमुक्तं । एष सर्वज्ञ इति ज्ञानरूपत्वमुक्तं । एष योनिः सर्वस्येत्युक्तसर्वसृष्ट्युपयुक्तत्वेन पूर्णशक्तित्वं च सिद्धं ॥

End:

पूर्वत्वात्पश्चिमत्वाच्चेति ग्राह्यं अन्यथाप्रतीतिं परिहृत्येदानीमर्थमाह— पूर्वेति । यत्प्रसादाद्यत्प्रीत्यै माण्डूकोपनिषद्भाष्यमुपक्रम्य समापितं तमेव तद्गुणैरुपश्लोकप्रणामेन समापयति— एकोपीति ॥ निर्विशेषोपीन्द्रार्जुनादिविशेषरहितोपि विश्वादि[च]रूपेण चतुर्धा सन्जाग्रदादिचतुर्धाव्यवहारभागित्यशेषमतिमङ्गलम् ॥

यः सर्वजीवनेत्रादौ स्थित्वा(ऽ)वस्था(ः) प्रदर्शयन् ।
मोक्षदश्च रमानाथं वन्दे तं मध्ववल्लभम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितमाण्डूकोपनिषद्भाष्य-
टीका जयतीर्थशिष्यव्यासतीर्थमुनिविरचिता
समाप्ता ॥ श्रीवेदव्यासाय नमः ॥

Subject: Māṇḍūkyopaniṣadbhāṣya ṭīkā, a gloss on Ānandatīrtha's bhāṣya, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition.

॥ माण्डूक्योपनिषदर्थसङ्ग्रहः ॥

1662. MĀṆḌŪKYOPANIṢADARTHASAṄGRAHAḤ.

Burnell's Catalogue No. 5867. Page 100. Left column. Substance—Paper. Size—11½ × 4¾ inches. Sheets—10. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Rāghavendra. Complete.

Beginning :

श्रीहयग्रीवाय नमः ॥

समस्तगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय विश्वादिचतुरात्मने ॥

अस्या उपनिषदो मण्डूकरूपी वरुण ऋषिः । चतु(तू)रूपी हरिर्देवता । केषाञ्चिच्छन्दोबद्धानां अक्षरगणनया अनुष्टुप्छन्दस्त्वं ज्ञेयं । मुमुक्षोरधिकारिणोऽखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तये समस्तव्यस्तप्रणवप्रतिपाद्यभगवदुपासनां वक्तुं प्रवृत्तेयमुपनिषत् । आदौ समस्तप्रणवप्रतिपाद्यं

तावदाह— ॐमित्यादिनायमात्मा ब्रह्मेत्यन्तेन । ये (ए)·
तदितिश्रवणाद्यदित्यन्वेति । ॐमित्युक्तमिति शेषः । अतं
जगदस्मिन्निति व्युत्पत्त्या ॐमित्युक्तं यद्ब्रह्म एतत् अक्षर-
मुच्यते इदमक्षरं सर्वं पूर्णगुणं । केन निमित्तेनोङ्कारवाच्यं
ब्रह्माक्षरमित्युच्यत इति रतो न क्षरते कालत्रयेऽपीति
व्युत्पत्त्या कालत्रयेप्येकप्रकारतया नित्यत्वहेतुनेति भा-
वेन प्रतिज्ञापूर्वं प्रवृत्तिनिमित्तमाह— तस्येति ॥

End :

एवमुक्तां समस्तप्रणवाभिधेयभगवदुपासनामनुवदन्
तदज्ञानिन(:) स्तवेनोपसंहरति— अमात्र इति । अमात्रः
भिन्नांशहीनः, अनन्तमात्रः विश्वाद्यनन्तांशः द्वैतस्योप-
शमः । सर्वानिष्टनिवर्तकः शिवः निर्दु(ः)खरूपः ॐकारः
ॐमित्याक्रियमाणः येन विदितो ज्ञातः स मुनिः मनन-
शीलः नेतर इति द्विरुक्तिः उक्तसर्वप्रणवार्थावधार-
णार्था ॥

प्रणवप्रतिपाद्याय चतुर्मूर्तिस्वरूपिणे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

Colophon :

इति माण्डूक्योपनिषदर्थानां सङ्ग्रहोऽत्र यः ।
राघवेन्द्रकृतस्तेन प्रि(प्री)यतां कमलापतिः ॥

श्रीकृष्णार्पणमस्तु ॥

Subject: Māṇḍūkyopaniṣadarthasaṅgraha—a gloss on this Upaniṣad, according to the Dvaita school of Philosophy.

Remarks :—The Ms. is in good condition.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1663. MUṆḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5857. Page 100. Left column. Substance—Paper. Size—$9\frac{1}{4}\times4\frac{1}{4}$ inches. Sheets—10. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Ānandatīrtha. Complete.

Beginning:

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

श्रीवेदव्यासाय नमः ॥ हरिः ॐ ॥

आनन्दमञ्जु(ज)रं नित्यमजमव्य(क्ष)यमच्युतम् ।
अनन्तशक्तिं सर्वज्ञं नमस्ये पुरुषोत्तमं ॥ १ ॥

मनोर्वैवस्वतस्यादावथर्वा ब्रह्मणोऽजनि ।
मित्रश्च वरुणश्चाथ प्रा(प्र)हेतिर्हेतु(ति)रेव च ॥ २ ॥

ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजः स्मृतः ।
सनकाद्यास्तु वाराहे ब्रह्मा विष्णोः सुतोऽग्रजः ॥ ३ ॥

(इति ब्रह्माण्डे ॥)

ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः ।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः ॥ ४ ॥

(इति परमसंहितायां)

* * * * *

न विष्णु(ष्णोः) सदृशं किञ्चित् परमं वापि मन्यते ।
सर्वोत्तमं तं जानन्तस्ते हि भागवतोत्तमाः ॥

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥

End:

ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभाव(ः) कैवल्यं स भवान्केवलो हरः ॥

(इत्यादि) ॥

मुक्तेभ्योऽपि मनुष्येभ्यो देवा एव गुणाधिकाः ।
तेभ्यो वायुस्ततो विष्णुः परिपूर्णगुणः सदा ॥
ये त्वेतदन्यथा विद्युस्ते हि यान्त्यधरं तमः ।
ये त्वेतदेवं जानन्ति ते यान्ति परमं हरिम् ॥

इति च ॥

देवानां सन्ततौ ज्ञाताः प्रायशो ज्ञानिनः कृते ।
बलवद्धेतुतश्चान्ये यस्माद्ब्रह्मविदः सुराः ॥
न सन्ततौ ब्रह्मविदो नराणां ज्ञानिनामपि ।
प्रायशः स्युः सुराणां च नियमोऽयं कृते यगे ॥
तस्मात्स भगवान्विष्णुर्ज्ञेयः सर्वोत्तमोत्तमः ।
सदा सर्वगुणैः पूर्णो योऽनन्तः पुरुषोत्तमः ॥ इति च ॥
प्रीयतां भगवान्मह्यं प्रेष्ठप्रेष्ठतमः सदा ।
मम नित्यं नमाम्येनं परमोदारसद्गुणम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं अथर्वणोप-
निषद्भाष्यं समाप्तम् ॥ श्रीकृष्णार्पणमस्तु ॥

Subject; Muṇḍakopaniṣad bhāṣya otherwise known as Atharvaṇopaniṣadbhāṣya in verses, belonging to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1664. MUNDAKOPANISAD BHĀSYAM.

Burnell's Catalogue No. 5858. Page 100. Left column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—4. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1663.

Remarks:—The Ms. is in good condition. The last verse in the end 'प्रीयतां भगवान् मह्यं + परमोदारसद्गुणः' is not found in this Ms. The readings of this Ms. are slightly different from those found in No. 1663.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1665. MUNDAKOPANISAD BHĀSYAM.

Burnell's Catalogue No. 5859. Page 100. Left column. Substance—Paper. Size — 10×4 inches. Sheets—8. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—125 Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1663.

Remarks:—The Ms. is old and is in good condition.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1666. MUNDAKOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6219. Page 100 Left column. Substance—Paper. Size—$7\frac{1}{8} \times 2$ inches. Sheets—12. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1663.

Colophon : Nil.

Remarks :—The Ms. is old and is in good condition.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1667. MUNḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5887 b. Page 100. Left column. Substance—Paper. Size—13×5 inches. Sheets—4 (3-6). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—Ānandatīrtha. Incomplete (wants end).

Beginning and subject—Same as No. 1663.

End:

ये त्वेतदन्यथा विदुस्ते हि यान्त्यधरं तमः ।
ये त्वेतदे(वं जानन्ति ते यान्ति परमं हरिम्)॥

Colophon : Nil.

Remarks :—The Ms. breaks off towards the end, omitting the last four verses. See the end of No. 1663. The Ms. is very old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1572.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1668. MUNḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 f. Page 100. Left column. Substance—Paper. Size—9¼×4 inches. Sheets—6 (21-26). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—115. Author—Ānandatīrtha. Incomplete (wants end).

Beginning and subject—Same as No. 1663.

End :

मुक्तोपसृप्यव्यपदेशात् जगद्व्यापारवर्ज प्रकरणादस-

न्निहितत्वाच्चेत्यादिना । भगवतापि स(र्वत्र भेदस्यैव सूचितत्वाच्च ।...) ॥

Colophon : Nil.

Remarks :—The Ms. breaks off towards the end. The Ms. is very old and is in a fairly good condition. For the other works contained in this Ms. see the Remarks on No. 1573.

॥ मुण्डकोपनिषद्भाष्यटीका ॥

1669. MUṆḌAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5860. Page 100. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—18. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Vyāsatīrtha. Complete.

Beginning :

सम्पूर्णसंविदानन्दसु(सु)खसर्वगुणात्मकम् ।
रमारमणमिष्टार्थं प्रपद्ये मध्ववल्लभम् ॥

आथर्वणीं मन्त्रोपनिषदं यथावद्व्याचिख्यासुर्भगवानानन्दमुनिर्निर्विघ्नेन परिसमाप्त्यादिहेतुभूततदुक्तगुणवद्भगवत्स्तुतिनतिरूपं मङ्गलाचरणमादावाचरति— आनन्दमिति ॥ आनन्दरूपमित्यानन्द उक्तः ॥

End:

पु(सु)राणां कुले प्रायशो ज्ञानिन एव भवन्तीत्येतत्कृतयुगनिष्ठमित्याह— सुराणामिति ॥ तस्माद्भगवज्ज्ञानस्यैवंमहिमत्वात् । समापितभाष्यो भगवानानन्दतीर्थमुनिर्भाष्यकरणप्रयोजनं सूचयन्भाष्यान्ते प्रणमति— प्रि(प्री)य(ता)मिति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिताथर्वणोपनिषद्भाष्यटीका जयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृता समाप्ता ॥

श्रीमध्वान्तर्गतश्रीवेदव्यासार्पणमस्तु ॥

Subject: A commentary on the Atharvaṇa (popularly known as the Muṇḍaka) Upaniṣad bhāṣya according to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition. According to the colophon given above, Vyāsatīrtha, author of this commentary is known as the disciple of Jayatīrtha.

॥ मुण्डकोपनिषद्भाष्यम् ॥

1670. MUṆḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5861. Page 100. Left column. **Substance**—Paper. **Size**—11½ × 4 inches. Sheets—11. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Vyāsatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1668.

Remarks:— The Ms. is old and is in good condition.

॥ मुण्डकोपनिषद्भाष्यटीका ॥

1671. MUṆḌAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5891 b. Page 100. Left column. Substance—Paper. Size—13×5¼ inches. Sheets—9 (9-17). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Vyāsatīrtha. Complete.

Beginning, end and subject—Same as No. 1668.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिताथर्वणोपनिषद्भाष्यस्य

विवरणं जयतीर्थपूज्यपादशिष्यव्यासतीर्थविरचितं समाप्तम् ॥

Subject: Muṇḍakopaniṣad bhāṣya ṭīkā, according to the Dvaita school of Philosophy.

Remarks:—The Ms. is very old and it is in a crumbled state, since all sheets are completely broken out. The following verse is given additionally at the end of this Ms.

"यो ब्रह्मादेरथर्वाद्यां विद्यामाप्य परावराम् ।
मुनिष्वाताश्च यो विष्णुर्विषयेऽहं नमामि तम् ॥"

For the other works contained in this Ms. see the list under Remarks on No. 1578.

॥ मुण्डकोपनिषद्भाष्यटीका ॥

1672. MUṆḌAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5862. Page 100. Left column. Substance—Paper. Size—9¾ × 4 inches. Sheets—16. Lines—9 to 12 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—Śrīnivāsācārya. Incomplete.

Beginning:

श्रीवेदव्यासाय नमः ॥

आनन्दादिगुणोद्रिक्तं स्वाश्रितानन्ददायकम् ।
आनन्दमुनिपं व्यासं स्वानन्दाय भजे मुहुः ॥ १ ॥
श्रीमदानन्दतीर्थाय(र्य) चरणावास(श्र)येऽनिशम् ।
रुद्रादिसर्वविबुधैः संसेव्योऽभीष्टदो सताम् ॥ २ ॥
येन वेदान्तशास्त्राणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्यं जयराजनिषेवकम् ॥ ३ ॥
वेदव्यासकरोद्भूतान्वेदेशाभिधयोगिनः ।
छान्दोग्यभाग्य(ष्य)सट्टीकाकर्तॄन्वन्दे निरन्तरम् ॥ ४ ॥

श्रीमध्वशास्त्रं समुद्दीय(दीर्य) मेऽस्मिन्
विश्वासहेतो(ः) समदर्शयन्ये ।
प्रदानसूत्रप्रतिपाद्यभावं
वन्दे गुरूंस्तान्धद्गुवर्यसंज्ञान् ॥ ५ ॥
अथैतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
अथर्वणोपनिषदो भाष्यं व्याक्रियते मया ॥ ६ ॥

इह हि सांसारिकदुःखदर्शनेन निरु(विर)क्तस्य शमादि-मतो मुमुक्षोरधिकारिण आत्यन्तिकानिष्टनिवृत्तीष्टप्राप्तिहेतु-भूतभगवत्स्वरूपज्ञापनाय प्रवृत्तापीयमाथर्वणी मन्त्रोपनि-षदन्यैरन्यथाव्याख्यातत्वेन न तद्ज्ञापनसमर्थेति मन्य-मानो भगवानानन्दतीर्थमुनिः तां यथावद्व्याचिख्यासुः (सुः) स्वयमन्तरायविधुरोपि अनवरती(ते)श्वरप्रवणका-यकरणवृत्तिरपि निरन्तरायप्रारीप्सितपरिसमाप्तेः प्रचयस्य च हेतुतया अविगीतशिष्टाचारपरम्परावगतं एतदुपनिष-त्प्रतिपाद्यगुणवद्भगवत्स्तुतिनतिरूपमङ्गलं शिष्यशिक्षार्थं ग्रन्थादावुपनिबध्नाति— आनन्दमिति ॥

End :

ये(ए)षः ज्ञानद्वारा भगवत्प्रीत्यर्थमनुष्ठितो निवृत्तकर्म-सन्दर्भो वा भवतां सुकृतस्य सुकृतलभ्यस्य लोके लोकस्य, यद्वा सुकृतस्य लोके लोकप्रसिद्धविषये तदर्थमिति याव-त् ॥ पन्थाः मार्गे अपरोक्षज्ञानद्वारा भवतीत्यर्थः ॥ प्रकृ-तकर्माचरणा........ ॥

Colophon : Nil.

Subject: Muṇḍakopaniṣaṭṭīkā—a commentary on Ānanda-

tīrtha's Muṇḍakopaniṣad bhāṣya, according to the Dvaita school of Philosophy.

Remarks :—The Ms. is in good condition. It breaks off in the middle.

॥ मुण्डकोपनिषत्खण्डार्थः ॥

1673. MUṆḌAKOPANIṢAD KHAṆḌĀRTHAḤ.

Burnell's Catalogue No. 5863. Page 110. Left column. Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—10. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—395. Author—Narasiṁhayati. Complete.

Beginning :

॥ श्रीगुरुभ्यो नमः ॥

श्रीमध्वनाथमानम्य व्यासतीर्थोक्तमार्गतः ।
आथर्वणमहामन्त्रसङ्क्षिप्तार्थः प्रकाश्यते ॥ १ ॥

इहामुत्र फलभोगविरक्तस्य शमादिमतो मुमुक्षोरधिकारिण अशेषानिष्टनिवृत्तये परमानन्दावाप्तये च वासुदेवं सम्यक् ज्ञापयितुमाथर्वणमन्त्रोपनिषत्प्रवृत्ता । तत्र श्रद्धाजननाय वेदपुरुषः आख्यायिकामाह— ब्रह्मेति ॥ ब्रह्मा विरिञ्चः सर्वदेवानां मध्ये प्रथमः अ[ज]ग्रे सन् वासुदेवाद्बभूव जज्ञे ॥

End :

अस्यामुपनिषदि कोऽधिकारी इत्यतः श्लोकेन वदन्नाह— तदेष इति । स्वविहितक्रियानुष्ठानवन्तः श्रोत्रियाः वेदवेदार्थविचारपराः ब्रह्मनिष्ठाः परब्रह्मनिष्ठमनस्काः स्वयं जुह्वतः यजमानतया होमकर्तारः एकर्षीन्श्रद्ध-


